राष्ट्रिय संस्कृत संस्थानम्

नवदेहली

गङ्गानाथ झा केन्द्रीय संस्कृत विद्यापीठ ग्रन्थमाला

॥ २१ ॥

पिपासा

॥ संस्कृतगज़लगीतिसंग्रहः ॥

डॉ० जगन्नाथ पाठकः

Rashtriya Sanskrit Sansthan
(Under the auspices of the Ministry of Human Resources Development of India)
Delhi

Ganganatha Jha
Kendriya Sanskrit Vidyapitha
TEXT SERIES

General Editor
Dr. G. C Tripathi

No. 21

PIPĀSĀ

by

Dr. Jagannath Pathak

योऽनूचानः स नो महान्
राष्ट्रियसंस्कृतसंस्थानम्

ALLAHABAD
1987

राष्ट्रियसंस्कृतसंस्थानम्

(केन्द्रीयशिक्षामन्त्रालयस्याङ्गभूतम्)

दिल्ली

—o—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठग्रन्थमाला

प्रधानसम्पादकः

डॉ० गयाचरण त्रिपाठी

—o—

एकविंशं प्रसूनम्

पिपासा

—o—

रचयिता

डॉ० जगन्नाथ पाठकः

—o—

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

चन्द्रशेखर आज़ाद पार्क

प्रयाग–२

१९८७

पिपासा

(संस्कृत-ग़ज़लगीतिसंग्रहः)

●

रचयिता

डॉ० जगन्नाथ पाठकः

प्राचार्यः

रणवीरकेन्द्रीयसंस्कृतविद्यापीठम्

जम्मू

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

चन्द्रशेखर आज़ाद पार्क

प्रयाग-२

१९८७

प्रकाशकः
डॉ० गयाचरण त्रिपाठी
प्राचार्यः
गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्
चन्द्रशेखर आज़ाद पार्क
प्रयाग–२

●

●

मूल्यम्

●

मुद्रकः
शाकुन्तल मुद्रणालयः
३४, बलरामपुर हाउस
प्रयाग–२

FOREWORD

With a sense of extreme gratification we are presenting to the lovers of modern Sanskrit poetry a collection of Sanskrit *Ghazels* by Dr. Jagannatha Pathak, a poet of Sahitya Academy fame. Dr. Pathak is a poet who does not believe in treading upon an oft- trodden path. Just as his *Kāpiśāyanī* broke new grounds in Sanskrit poetry and won him the coveted Sahitya Academy award in 1981, so also is there an absolute freshness in the present collection of short poems composed in the style of Persian and Urdu Ghazels by using oft the same symbols and images which are a part of Urdu poetry. The essensial character and atmosphere of the poems, however, remains typically Indian embedded deeply in the canons of Sanskrit literature.

The *Pipāsā* is like a rose garden wandering in which the reader smells the fragrance of full-bloomed fresh flowers carried on to him by a mild spring breez which tosses, caresses and kisses every flower on a sunny day.

Though it is certainly not the first attempt towards composing *Ghazels* in Sanskrit—and Sanskrit Ghazels are a well known form of literary expressions in this part of country—yet, I must say, that no one yet else has attempted such a large number of Ghazels with such a superb literay quality.

The *Pipāsā* or the thirst of the poet is not a common thirst. It is a longing for unrealised dreams, something unachieved—perhaps even unattainable, hence bound to remain a thirst never to be quenched, never to be satiated. Every reader shall discern that he shares *his* Pipāsā with the poet.

But what this *Pipāsā* is perhaps capable of quenching, is his thirst for fresh literary forms and expressions in Sanskrit. There are verily thirsts which cannot be quenched by drinks and there are 'thirsts' which can be quenched by still more 'thirsts'—

पिपासुना हि मया पीयते पिपासेयम्

G. N. Jha Kendriya
Sanskrit Vidyapeetha
Allahabad
26th January, 1987

G. C. Tripathi
Principal

स्वगतम्

[काव्यनिर्माणमेकाऽऽन्तरिकी प्रक्रिया । स्वस्या एव रचनाया विषये भूमिकारूपेण किञ्चिदुदीरणमन्या सर्वथा बाह्या प्रक्रिया । उभयोरनयोः सामञ्जस्यसाधनं दुष्करमिव समापतितम् । प्रसंगेऽस्मिन् साम्प्रतमात्मानं द्विधा विभक्तं परिकल्प्य प्रश्नोत्तर-पद्धत्या यत्किञ्चिदुदीरयितुं प्रयते । प्रयत्नोऽयं किञ्चिन्मात्रमपि साफल्यं चेदवाप्नुयात्, यथा कथञ्चित् च सुधियां सहृदयानां तोषाय प्रभवेत् ततो मदभीप्सितं सिद्धं स्यात्]

पूर्वंप्रकाशिताभ्यां संस्कृतकाव्यरचनाभ्यामतिरिक्तेयं पिपासेत्याख्या तव रचना । यथोभयमपि मुक्तकं काव्यं तथेयमपि । अथ च प्रणयं विप्रलम्भं वा मूलाधारतया प्रकल्प्यैव यथा पूर्वमुभयं रचितं तथेयमपि । प्रायः प्रतीकान्यपि तान्येव सन्ति । केवलं छन्दोयोजनायामेव नावीन्यं किञ्चित् परिलक्ष्यते । यदि यत् त्वयाऽभिधेयमासीत् तत् सर्वमभिहितपूर्वमेव, तस्यैव केवलं कतिपयशब्द-परिवर्तनपूर्वं नवच्छन्दोयोजनया गजलरूपेण प्रस्तुतीकरणमिदं पुनरुक्तमिति कृत्वा नापेक्षितमिव प्रतिभाति । किमिदं पुनरुक्तिमात्रमपूर्ववस्त्वनुसन्धानपराणां सहृदयानां वैक्लव्याय न सम्पद्येत ?

सत्यमाह भवान् । काव्यनिर्माणप्रवृत्तेन किञ्चिदकथितमेव कथनीयम् । किञ्चिदपूर्वमेव प्रस्तोतव्यम् । परमिदं तस्य निर्माणप्रवृत्तस्य पक्षे सङ्घटते यः सहृदयेषु निजस्य कवित्वस्य प्रतिष्ठायै प्रयतते, सकलसहृदयमनोरञ्जनमेव यस्य चरममुद्देश्यम् । किन्तु यस्य कृते निर्माणप्रवृत्तिर्वैवश्यं स किं कुर्यात् ? यथा कश्चिदर्चकः स्वस्य देवस्य पुरः पूर्वमुक्तामेव स्तुतिं विभिन्नं रागमाश्रित्य प्रस्तौति तथैव वराकोऽयमिति स्वीक्रियताम् । एतावतापि केचन सहृदयाः श्रुतमपि श्रोतुं प्रवर्तन्ते, ज्ञातमपि पुनर्ज्ञातुमभिनिविशन्ते तर्हि तेषामनुग्रह एवायं सुमहान् ।

पुनरुक्तय एव केवलं यदपीमाः सकला मदुक्तयः ।
तदपीह निशम्य सम्मुदं तनुषे तत्तु तवैव मार्दवम् ॥

मम काव्यरचनारम्भस्तादृशस्यैव गतानुगतिकस्य परम्पराबद्धस्य काव्यप्रकारस्य निर्माणेन प्रावर्तत, परं पश्चात् भारतीयस्य प्रवर्तमानयुगस्य भाषासु विविधानां नवनवानां काव्यविधानां प्रयोगमाकलय्य साहित्यञ्च जीवनस्य दर्पण इति स्वीकृत्य मया स्वस्य कृते नवीन एव काव्यविधानप्रकार आश्रितः। अत्र पारसीकसाहित्यस्य उर्दूसाहित्यस्य च पुष्कलः प्रभावः स्पष्टतयाऽऽकलयितुं शक्यते। नहि मया किमप्यान्दोलनं समारब्धुकामेन कश्चन प्रयासः कृतः। अक्षुण्णस्य पथ आश्रयणं कोऽपि मदीयः स्वभाव इति कृत्वैव मया तत् कृतं स्यादिति वक्तुं शक्यते।

'पिपासा' तु सर्वथा पारसीकसाहित्य-उर्दू-साहित्यपरम्परायामेव गजलपद्धतिसमाश्रयणेन प्रस्तुता। त्वत्पूर्वभाविनाऽपि केनचिदियं पद्धतिराश्रिता न वा ?

आश्रिता। जयपुरतः १९२९ खिस्ताब्दे मञ्जुनाथोपाह्वेन कविशिरोमणिना स्व० भट्टश्रीमथुरानाथशास्त्रिणा 'गीतिवीथी' नाम्नी रचनैका प्रकाशिता। तस्यां 'उर्दूभाषाचत्वरे' अष्टपञ्चाशत् संख्याका गजलगीतयः सन्ति। अन्यैरपि संस्कृतकविभिः श्रीजानकीवल्लभशास्त्रिप्रभृतिभिर्गजलगीतयो लिखिता इति श्रूयते।

तव गजलगीतिषु मञ्जुनाथशास्त्रिणां च तासु केनचिद् भेदेन भाव्यम् ?

अवश्यम्। परं भेदः कियान् किम्प्रकारकश्चेति चिन्ताभारः परेषामालोचकाग्रगण्यानामेव पक्षे मया निक्षिप्तः।

तव गजलगीतीनामाकलनेन प्रतीयते यत् त्वया यथाऽन्त्यानुप्रासानां निर्वाहे अवधानं दत्तं न तथा 'क़ाफ़िया' पदवाच्यानां पश्चाद्गतानुप्रासानां निर्वाहे। शैथिल्यमिव ते प्रतीतिपथमेति।

सत्यम्। मया क़ाफ़ियानिर्वाहेऽवश्यं शैथिल्यं कृतम्। संस्कृते तादृशानुप्रासमयपदानां तथा सौलभ्यं नास्ति इति ममानुभवः। मञ्जुनाथशास्त्रिणां गीतिष्वपि तादृशं शैथिल्यं श्रुतिगोचरं भवति। मया यत्र तत्र भाषायाः प्रवाहमयतामनुरुन्धता संयुक्ताद्यस्य अक्षरस्य दीर्घत्वमपि न निर्व्यूढम्। यथा 'तव द्वारि श्रीविशाले' इत्यत्र। अत्र 'द्वा' इत्यतः पूर्वं 'व' इत्यक्षरं 'श्री' इत्यतः पूर्वं 'रि' इत्यक्षरं न गुरुतां नीतम्। न केवलं मयैव कृतम्, स्व० मञ्जुनाथशास्त्रिवर्यैरप्येतत् कृतम्।

भवतु, गजलशब्दार्थः कः ? गजलगीतिपद्धतेरस्याः किं वैशिष्ट्यम् । आधुनिके भारतीये साहित्येऽस्याः प्रभावो बाहुल्येनानुभूयते । संस्कृतस्य पक्षे पद्धतेरस्या आश्रयणं सर्वथा प्रवाहतो विपरीतमेव लक्ष्यते ।

'गजल' इति शब्दः आरब्यभाषाया अस्ति । अस्य शब्दार्थः स्त्रिया सहैकान्तिकी वार्ता, प्रियया साकं नर्मालाप इति । अथ च शब्दोऽयं एकस्या काव्यपद्धतेरपि सूचकतां बिभर्ति ।

अस्याः पद्धतेर्वैशिष्ट्यं केवलं यदि नामसंक्षेपेण लघुवाक्येनैकेन कथ्यते तदा वक्तुमेवं शक्यम्- 'गजले' प्रणयस्य भाषया प्रणय एव अत्र विषयीक्रियत इति । यथा च गजलगीतेः संयोजनं भवति तथोच्यते । पारसीकसाहित्यानुसारमुर्दूसाहित्यानुसारञ्च गजले मुक्तकरूपाणि परम्परासम्बद्धानि कतिपयानि 'शेर' इत्याख्यातानि विविधच्छन्दःसु विरचितानि पद्यानि 'मिसरा' इति वाच्यानि भवन्ति । प्रथमं 'शेर' मतला इत्युच्यते, अन्त्यञ्च मकता इत्युच्यते । मतलापद्ये द्वयोरपि पंक्त्योरनुप्रासो भवति । अन्येषु च पद्येषु केवलं द्वितीयपंक्तावेव भवत्यनुप्रासः पूर्वानुप्रासानुगतः । अन्त्ये च मकतानाम्नि पद्ये प्रायः कवेः (शायर) पदवाच्यस्य नाम उपनाम वा प्रयुक्तं भवति । अयञ्च नियमो निरङ्कुशैः कविभिः नैव दृढतया स्वीक्रियते ।

यद्यपि प्रेयसीभिः सह नर्मालाप एव गजलाख्यायाः काव्यपद्धतेर्मूलाधारस्तथापि नेयं प्रणयमात्रसीमिता । शृङ्गारमतिरिच्याप्यनेके राजनीतिदर्शनादिविषया अस्यामुपलब्धुं शक्यन्ते । अमी प्रणयेतरविषयाः प्रायः सर्वेषु गजलपद्धतिप्रवृत्तेषु कविषु यत्किञ्चिदुपलभ्यन्ते । आधुनिकेषु कविषु प्रायः प्रणयेतरविषया एव मुख्यतया गजलपद्धत्याऽभिधीयन्ते । अद्यत्वे राजनीतिरेव शृङ्गारमभिभूय पद्धतावस्यां विराजमानाऽनुभूयते । मूलाधारोऽस्याः शृङ्गार एवेति कृत्वा किञ्चिन्मात्रं तत्स्पर्शः सत्यपि विषयवैविध्ये सर्वथाऽत्र लभ्यत एव । प्रणयनिवेदनञ्च सङ्केतेन भवतीति साङ्केतिकीयं वाक्प्रवृत्तिः सरसचेतोभिरेव भावुकैर्जनैर्ग्राह्या भवति । अत्र बिन्दौ सागरस्य समावेशः क्रियते, अर्थात् अतीव संक्षिप्तेन वाग्विन्यासेन महीयानर्थविशेषः प्रस्तूयते ।

अत्र मतला इत्याख्ये प्रथमे शेरे' 'मिसरा' इत्याख्ययोर्द्वयोः पङ्क्त्योः 'काफ़िया' (पंक्तेरन्ते समानरूपा भिन्ना शब्दाः) 'रदीफ़' (पंक्तेरन्ते वारं-वारं प्रयुक्ताः शब्दाः) भवन्ति । गजलपद्धतेरन्ते प्रयुक्तं पद्यं 'शेर' 'मकता' इत्युच्यते । अत्र कवेरुपनाम निबद्धं भवति । अस्यां पद्यानां कापि सीमा नास्ति, तथापि एकादश त्रयोदश वा पद्यानि भवन्ति । अत्र केचन् प्रतीकशब्दा

अभिधीयन्ते । यथा, 'मधु' । अनेन सांसारिको वा ईश्वरगतो वा प्रणयोऽभिधीयते । 'नीडमपि' प्रतीकतया गूढार्थस्य देशार्थस्य सूचनाय प्रयुज्यते । विद्युत् अस्य नीडस्य शत्रुः । सा च दैव्या विपदः सूचनार्थमुपयुज्यते ।

प्रस्तुते संग्रहे कतिचन नियमाः शिथिलतां नीताः । तदर्थं रसिकाः प्रस्तोतुः कामप्यशक्तिमनुभूय कृपया क्षन्तुमर्हन्ति । यथाऽनिवार्यकाफियाप्रयोगे शैथिल्यमस्माभिर्वर्तितम् । संयुक्ताद्यस्याक्षरस्य गुरुत्वादावपि ।

केचन तु त्वत्काव्यं गालिबप्रभृतीनां कवीनामनुवादमात्रमिति प्रचारयन्ति । तद्विषये तवास्ति कश्चिद् वाग्विशेषः ?

यत्र कुत्रापि महीयसां तादृशानां कवीनां छायानुहरणं मद्रचनायां लब्धुं शक्यम्, किन्तु सर्वत्र तदेव वर्तत इति केषाञ्चित्कथनं मूलानालोचननिबन्धनमेव ।

किं तादृशं परम्पराबद्धं काव्यं कस्याप्याधुनिकस्य मौलिकस्यार्थजातस्य संवहने क्षममिति मन्यते त्वया ?

मन्यते । अत्र नावीन्यमाधुनिकत्वञ्च वक्तव्यस्य प्रस्तुतीकरणे भवति । प्राचीनविधायाः समाश्रयणं न किमपि बाधकतां भजति । किं ग़ज़लपद्धतिराधुनिकी ? न खलु । सा प्राचीनैः हाफ़िज़प्रभृतिभिः पारसीकभाषाकविभिः क्षुण्णा, उर्दूभाषाकविभिश्चाभ्यस्ता । परं संस्कृतक्षेत्रे सा कतिपयैरेवानुसृतेति तत्र किञ्चिन्नावीन्यमनुभवितुं शक्यम् ।

भवतु, गजलपद्धतौ कतिचन प्रयोगा बहोः कालादेव प्रचलन्ति । तत्सर्वमपि त्वया 'पिपासायां' स्वीकृता न वा ? किं वा तत्र स्वातन्त्र्यमवलम्बितम् ?

स्वातन्त्र्यं हि कस्यापि साहित्यनिर्माणे प्रवृत्तस्य कलाक्षेत्रे च कृतोद्योगस्य जन्मसिद्धोऽधिकारः । यद्यपि यथावसरं मया तादृशानि प्रतीकानि स्वीकृतानि, प्रतीकभाषयैव सांकेतिकशब्दावल्यैव रचनायामहं प्रवर्ते । अभिधा मम नैव सम्मता । यथाशक्यं व्यञ्जनामाश्रित्यैव यत्किञ्चिद् वक्तुं प्रयते । परं केचन सुधियः अङ्गनासु लावण्यमिव किञ्चिदतिरिक्तं प्रतीयमानमर्थं ध्वनिसम्मतं न लभेरन्निह चेन्मदीयाऽक्षमतैव तैः कल्पनीया । तद् विषये न मे किञ्चिदभिधेयम् । मया यदेव सहजतयाऽनुभूतं यच्च मया स्वस्य सहजस्यानुभवस्य

व्यञ्जने क्षमं शब्दजातं, विनैव कमप्यतिरिक्तं प्रयासमुपलब्धं, तदेवोपनिबद्धम्। अग्रे काव्यानुशीलनाभ्यासनिपुणाः स्वहृदयसंवादभाजः सहृदया एव प्रमाणम्।

त्वदीये काव्ये आत्माभिव्यक्तिरिव सर्वत्र लभ्यते। कथमियं त्वयाऽऽश्रिता? इयं खलु तवाहम्भावमेवाभिव्यनक्ति, न तु कवित्वम्।

आत्माभिव्यक्तिर्मम लेखने परिस्फुरतीति न मया निषिध्यते। परमात्मनिवेदनमेव मे सहजा प्रवृत्तिरिति मन्ये। आत्माभिव्यक्त्या तया कस्याप्यहम्भावो द्योतत इति नाङ्गीक्रियते। परं तत्र कश्चन निगूढ आकलनीयो मनोभावः स्फुटतामेति। एवं कुर्वाणः साहित्यकारः स्वपाठकानां न्यायालये साक्षादुपतिष्ठति।

तव पिपासेयं कामिव ते पिपासां संकेतयति?

अयं खलु प्रश्नः सहृदयानां पुरो भवता निवेदनीयः। त एव मामकीं पिपासां मदपेक्षयाऽधिकं ज्ञातुमर्हन्ति। मया तु स्वरचनायां सर्वमात्मनो हृद्गतमुद्घाटितम्। इतोऽपि किञ्चिदतिरिक्तं वक्तव्यमवशिष्यत इति नाहं वेद।

संस्कृतसाहित्यस्य प्रवर्तमाने कालेऽनेकैः कविभिः परम्परागतैव या काव्यनिर्माणप्रवृत्तिरङ्गीकृता, तामनादृत्य त्वया काऽप्यभिनवा वैदेशिकी पद्धतिरवलम्बिता। साहित्यक्षेत्रे किमिदं कस्यचिन्नवीनस्यान्दोलनस्य प्रवर्तनाय वा विहितं त्वया, कस्यचित् प्रभावविशेषस्य प्रवर्तनाय वा?

संस्कृतकाव्यस्य या पारम्परिकी पद्धतिः सा सर्वथाऽस्याः पद्धतेर्भिन्नैवेति नात्र सन्देहः। परं विपरीतेति नैव शक्यं वक्तुम्। साहित्यस्य क्षेत्रं सर्वथा जीवनमिव परिवर्तनशीलम्। कतिचन साहित्ये वैदेशिकं प्रभावं न सहन्ते। हिन्दीसाहित्ये न केवलं पद्यकाव्यविधासु, गद्यविधास्वपि यादृशानि परिवर्तनानि जातानि, तानि शनैः शनैर्विद्वज्जनमनोग्राहितामुपयातानि। संस्कृतस्य स्थितिः सर्वतः काचिद् भिन्ना। अत्र प्रायः परम्परैव सर्वस्वमिति मन्वानाः बाहुल्येनाद्यापि लभ्यन्ते। अत एवाद्यत्वेऽपि संस्कृतकवितायां तादृशो विकासो नानुभूयते। यद्यपि बहवः संस्कृते निर्माणनिपुणा अद्यापि महाकाव्यानि निर्मान्ति, नाटकानि च लिखन्ति, मेघदूतपरम्पराऽप्यद्यावधि सुरक्षितैव। तथापि

छन्दोमुक्तशैल्या काव्यलेखनं 'सानेट' आदि वैदेशिकपद्धत्याश्रयणञ्च विरलमेवोपलभ्यते। ये चाङ्गुलिपरिगणनीयाः कतिपये प्रयोगमेतादृशं कुर्वन्ति, तेषामुत्साहं न बहवः संवर्धयन्ति।

एके मत्सुहृदः संस्कृतोर्दूभाषयोः 'वक्रोक्ति-बाँकपनयो'र्यथाऽन्तरं तथा किञ्चिदन्तरं सूचयन्त आहुः—संस्कृतं नाम वागाटोपस्य साहित्यम्। 'उर्दू' नाम भावस्य साहित्यम्। स्यान्नाम किञ्चित्सत्यत्वं तेषामुक्तौ। परं मया संस्कृतमपि भावस्य भाषेति उर्दूगजलरूपकाव्यपद्धतेः समाश्रयणेन यत् किञ्चित् साधयितुं प्रयतितम्। अत्र यदीयं साफल्यमसाफल्यं वेति सहृदया एव विचारयितुमर्हन्ति। प्रसंगेऽस्मिन् महाकवेः ज़ोकस्य पद्यमेकं प्रस्तूयते—

है उनकी सादगी भी तो कुछ इक फबन के साथ।
सीधी सी बात भी है तो इक बाँकपन के साथ।

———

ययोरन्तिके वसता जनेनानेन सुबहु श्रुतम्

तयोः

'सहसराम'वास्तव्ययोः

सहजस्नेहवतोः काव्यमर्मज्ञयोः दिवंगतयोः

पं० रामरूपपाठक—श्री अल्ताफहुसेन 'मानूस' महाशययोः

पुण्यायै स्मृत्यै पिपासानाम्नीं कृतिमिमां

सादरभरं समर्पयति

पिपासा

दृशस्तवैव शुभायाः फलं पिपासेयम्,
निवार्यतां न कदापि क्षणं पिपासेयम् ।

सरांसि सन्तु सकुशलानि ते तथा नद्यः,
मयोररीकृता जगति स्वयं पिपासेयम् ।

लभे शमं कुत एव त्वमेव निर्दिश माम्,
प्रवर्धते यदा मदन्तरं पिपासेयम् ।

पयोनिधिं क इह प्राप्य रे तटस्थः स्यात्,
किमप्युदेति यदभ्यन्तरं पिपासेयम् ।

क्व भाग्यमेव तथा हन्त भाग्यमेव कुतः,
उदेति भाग्यवतः सन्ततं पिपासेयम् ।

क्व दूरदूरगतान् यामि पर्वतान् शरणम्,
समीपमानयेत् सुनिर्झरं पिपासेयम् ।

न मां पिपासुषु साधारणेषु गणय त्वम्,
निपीयते हि मया केवलं पिपासेयम् ।

विधात्रा किं कृतं भाले, न जाने,
न जाने त्वां सुदृग्जाले ! न जाने ।

तव च्छायाऽपि लब्धुं शक्यते किम्,
क्व दूरे त्वं महाशाले, न जाने ।

क्वचिद् वर्णे सुवर्णे ! लभ्यसे त्वम्,
क्व वा गौरे क्व वा काले, न जाने ।

निमग्नोऽहं महानद्यास्तटे वा,
तरङ्गे वा महोत्ताले, न जाने ।

भिदामेष त्वदीये किञ्चिदास्ये,
प्रसन्ने वाऽथ विकराले, न जाने ।

मयेह श्रूयते मृदु भाषितं ते,
त्वदीयं हृद्गतं बाले ! न जाने ।

कुतस्त्वं दृष्टिनिक्षेपं विधत्से,
क्व मूके वा क्व वाचाले, न जाने ।

चित्त ! जगतीह केयमाशा ते,
नाशयेत् त्वामरे दुराशा ते ।

दूरतस्त्वां मरुस्थलीष्वेषा,
भ्रामयेत् सन्ततं पिपासा ते ।

हन्त तस्या इमे सदा नेत्रे,
मन्मनोमन्दिरे चकासाते ।

शोभने ! विस्तृता कृपादृष्टिः,
किन्तु मह्यं कृतावकाशा ते ।

कुत्र निपतेद् दृगाशुगप्रसरा,
अर्धमर्ध स्फुरद्विलासा ते ।

मामुपेयात् कदाचिदाशु मतिः,
हन्त सफलीभवत्प्रयासा ते ।

तत्र लभ्यं सुखं क्व तन्नेत्रे,
द्वे इमे यत्र नित्यमासाते ।

विना त्वद्दृष्टिपातं रे जगत्यां कः शमं लभते,
सुजाते त्वद्दृशोः पाते जगत्यां कः शमं लभते ।

समुद्यन्मेघकल्पं केशजालं तच्छिरसि यावत्,
वशीभूतो नु तावदये जगत्यां कः शमं लभते ।

पठन् गीतां पुराणान्येव नक्तंवासरं शृण्वन्,
निबद्धस्तत्प्रणयपाशे जगत्यां कः शमं लभते ।

न पीतं येन तद्भाग्यस्य विषये किं वदाम्येषः,
क्षणं यः पीतवान् मधु ते जगत्यां कः शमं लभते ।

अभावैः केचिदुद्विग्नाः प्रभावैः केचिदुद्विग्नाः,
विशालायां वद त्वं रे जगत्यां कः शमं लभते ।

कठोरस्त्वातपः सर्वत्र सर्वं जर्जरीकुरुते,
करे छाया तु भवदीये जगत्यां कः शमं लभते ।

परित्यज्य स्ववासः शेरते केचिद् वने मुग्धाः,
वने तस्मिन् मया दृष्टे जगत्यां कः शमं लभते ।

कठोरं वज्रवत् तासां नु हृदयं किं मृगाक्षीणाम्,
निपतितो यद्दृशोः पाते जगत्यां कः शमं लभते ।

न जाने कोऽयमपराधः फलीभूतोऽस्ति लोकस्य,
तदावासाद्बहिर्भावे जगत्यां कः शमं लभते ।

दृशा पीतं तृषा पीतं क्षणं पीतं सदा पीतम्,
न जाते किमपि तत्पाने जगत्यां कः शमं लभते ।

नैव जानन्ति किमप्यत्र हसन्तः केचित्,
मादृशे मत्तजने सन्ति हसन्तः केचित् ।

पायिनो हन्त बहूनत्र त्रिलोके लोके,
सत्पिपासाजुष एतर्हि पिबन्तः केचित् ।

सारमेवञ्च मितं भाषितमाहुः शस्तम्,
काकवद् व्यर्थमितः सन्ति रटन्तः केचित् ।

त्वद्गतं मौनमिदं मेऽद्य समाधानमभूत्,
किञ्चिदतिरिच्य परं तेऽभिलषन्तः केचित् ।

ते तु धावन्ति जना यैर्हि समीपे गम्यम्,
दूरगन्तार इतो यान्ति पतन्तः केचित् ।

लाभहानी तु परामृश्य वलन्ते बहवः,
स्वं विना लाभमितः सन्ति कियन्तः केचित् ।

बहव एवेह शुचा सन्ति तु भरिता निजया,
शोकमन्यस्य परं सन्ति हरन्तः केचित् ।

शोभया कृत्रिमया हन्त परे शोभन्ते,
शोभितं यैर्हि जगत् ते तु लसन्तः केचित् ।

सन्ति बहवो हि तरन्तोऽपि ये निमज्जन्ति,
किन्तु लोकान् स्वयमुत्तार्य तरन्तः केचित् ।

सन्ति वृक्षेष्वपि, ये हन्त फलन्ति व्यर्थम्,
मोदयन्तः स्वफलैस्ते तु फलन्तः केचित् ।

यस्य यापनमेवमपि किमु जीवनम्,
जीवनं न हि किञ्चिदपि किमु जीवनम् ।

लभ्यते हस्तावलम्बो नैव ते,
भार एवास्ते तदपि किमु जीवनम् ।

पुष्पवद् विकसेत् तदेव तु जीवनम्,
म्लानिमुपलब्धं सदपि किमु जीवनम् ।

जीवनं शतधा विभक्तं हन्त यत्,
जीवनं तत्किञ्चिदपि किमु जीवनम् ।

त्वां विना यदि यापितं स्याज्जीवनम् ।
मृत्युरेव न किं तदपि किमु जीवनम् ।

स्थाणुमूर्धस्थोऽपि गृध्रो जीवति,
गृध्रतां गतवत् तदपि किमु जीवनम् ।

स्पर्धते सूर्येण यः स खगो महान्,
कौशिकस्य तदेवमपि किमु जीवनम् ।

ये हसन्तः सन्ति ननु जीवन्ति ते,
हन्त रुदतां किञ्चिदपि किमु जीवनम् ।

जीवनं रामो हि रामो जीवनम्,
रावणत्वमुपेतमपि किमु जीवनम् ।

रुदितेन विलीयन्ते हसितेन विलीयन्ते,
तव मुग्धमुखे हासाः कथमेव विलीयन्ते ।

शंसन्ति सदा सन्तो हितमेव हितं लोके,
कुटिलैस्तु जनैरेते भृशमेव विगीयन्ते ।

इह कण्टकान् लभन्ते शिथिला हि मन्दभाग्याः,
कुसुमानि दुर्विदग्धैर् द्रुतमेव विचीयन्ते ।

कस्येदमुदीर्यं रे कस्येदमुदाहार्यम्,
स्निग्धैस्तु मधूनीत्थं नयनेन निपीयन्ते ।

गुरवो हि सहस्रेषु क्वचिदेव मिलन्त्येते,
यैर्नाम समे शिष्या मौनेन विनीयन्ते ।

यत्रार्थकुबेरास्ते वैफल्यमुपायान्ति,
तत्राशु मुदा निःस्वैः स्वान्येव विनीयन्ते ।

हृदयेन तथा येषां योगो न भवेत् किञ्चित्,
गीतानि जनैः स्निग्धैर्नैवेह निपीयन्ते ।

त्वामहं नैव शोभने जाने,
किञ्च न त्वद्विलोचने जाने ।
त्वद्वपुर्गन्धमन्यतो न लभे,
तादृशं किन्तु चन्दने जाने ।
गूढ आस्ते स मय्यहा तदिदम्,
तं विचिन्वन् वने वने जाने ।
एक एवास्ति हृद्गतः स इति,
दुर्जने वाऽपि सज्जने जाने ।
दृष्टिरन्यत्र चान्यतो हृदयम्,
त्वामहो नाहमङ्गने, जाने ।
हृद्गतं स्वं स्वहृद्यवन्तीं त्वाम्,
स्निग्धलोकैकवञ्चने जाने ।
मत्पुरो हन्त ते न तात्पर्यम्,
रूपचन्द्रावगुण्ठने जाने ।
किन्न ते चेष्टितं मदीयस्य,
हृद्वराकस्य भञ्जने जाने ।
त्वद्दृगेषा परं समर्थेति,
मारणे वाऽपि पालने जाने ।
त्वत्करस्यैव रे चमत्कारम्,
मोहितोऽहं जने जने जाने ।
तां च तस्या दृशं परित्यज्य,
नैव किञ्चित् स्वजीवने जाने ।
किं न किं जानते जनाः सर्वे,
एष किञ्चिन्न जीवने जाने ।

आगतो द्वारि कश्चिदेव स्यात्,
यत्प्रतीक्षाऽस्ति ते स एव स्यात्।
स्निग्धसद्भावया स्वदृष्टया त्वम्,
वीक्षसे यं स भिन्न एव स्यात्।
यस्त्वया कल्पितो नवीन इति,
सोऽपि कश्चित् पुराण एव स्यात्।
यं तु परकीय इत्युदीरयसि,
मुग्ध ! सोऽपि त्वदीय एव स्यात्।
वस्तु यत् त्वत्पुरः स्फुरत्यधिकम्,
तन्न सर्वं सुवर्णमेव स्यात्।
साम्प्रतं यं हि कण्टकं मनुषे,
त्वत्कृते स प्रसूनमेव स्यात्।
केयमाशा च कैव प्रत्याशा,
पत्रमाप्तं तदीयमेव स्यात्।
यस्त्वया कल्प्यते प्रपूर्ण इति,
अन्तरे सोऽपि रिक्त एव स्यात।
पश्य पश्य क्षणं सखे पश्य,
द्वार्युपेतो वसन्त एव स्यात्।
मुक्त इत्युच्यतां परं बद्धः,
प्रेमपाशे स बद्ध एव स्यात्।
अस्तु नाम्ना जनो 'जगन्नाथः',
स स्वयं कोऽप्यनाथ एव स्यात्।

—२—

मदीयं चेत् समस्तं न त्वदीयम्,
त्वदीयं स्यात् कथं कृत्स्नं मदीयम् ।
परित्याज्यस्त्वया रे भेदभावः,
समं रे यत् त्वदीयं वा मदीयम् ।
स्मितस्यास्ति त्वदीयस्यैव लीला,
सुजातं यत् त्वदीयं तन्मदीयम् ।
स्फुरद्भासं महत्त्वे यत् त्वदीयम्,
लसल्लीलं लघुत्वे तन्मदीयम् ।
त्वदीयामेव वीणामाश्रितानाम्,
स्वराणां वासभूर्हृदयं मदीयम् ।
चमत्कारस्त्वदीयापाङ्गयोः किम्,
त्वदीये तद् विलीनं यन्मदीयम् ।
जलाख्यं यच्च रे रूपं त्वदीयम्,
निबद्धं तेन तत् शैत्यं मदीयम् ।
सुसाहित्यं स्वरूपं रे त्वदीयम्,
सुसङ्गीतं स्वरूपं रे मदीयम् ।
यदेतत् शोभनं वाऽशोभनं वा,
त्वदीयेनैव सम्बद्धं मदीयम् ।
कृपावृक्षे त्वदीये सत्पलाशे,
नगण्यं निर्मितं नीडं मदीयम् ।

असत्यं प्रायशोऽस्मिन् संगिरन्ते,
कियन्तः सत्यमस्मिन् संगिरन्ते।

बहूनां लोचनेऽश्रूणां प्रवाहः,
परं केचित्तु हृदयेन व्यथन्ते।

अशक्ता हन्त लोके व्याहरन्ति,
परं ते मौनिनो ननु ये क्षमन्ते।

कृते तेषां निषेधो वा विधिर्वा,
स्वभावेनैव लोके ये त्रपन्ते।

परामृश्य प्रवृत्ता लाभहानी,
विवेकस्थाः फलं मधुरं लभन्ते।

स्वालाभार्थं किमपि येषां न दैन्यम्,
सदा ते नन्दनोद्याने रमन्ते।

त्वदीयो दृष्टिपातो येषु जातः,
न किञ्चित् ते हि लोके कामयन्ते।

ये तटेऽपीह निमज्जन्ति जनास्ते वन्द्याः,
ये तरङ्गैः सह संघर्षरतास्ते वन्द्याः।

वैभवं तामसमङ्गीकुरु नो हानिरिह,
स्पर्धमानाः परमर्केण जनास्ते वन्द्याः।

वैतसीं वृत्तिमुपाश्रित्य नमन्तो वन्द्याः,
भग्नतां येऽपि गता नैव नतास्ते वन्द्याः।

पीडिताः केचिदिमे हन्त रुदन्तो वन्द्याः,
पीडया केऽपि परीताश्च हसन्तो वन्द्याः।

दुर्दिनान्येवमुपायान्ति त्वनाहूतानि,
स्वागतीकृत्य समाधानरतास्ते वन्द्याः।

ये कठोरा ननु वज्रादपि रे ते वन्द्याः,
ये च कुसुमादपि मृदवस्तु जनास्ते वन्द्याः।

अन्धमुत्तीर्य तमो मार्गमवाप्ता वन्द्याः,
ये प्रकाशेऽपि च विचलन्ति पथस्ते वन्द्याः।

स्वेषु ये स्निग्धतमाः केऽपि जनास्ते वन्द्याः,
ये विपन्नेषु दयन्ते च जनास्ते वन्द्याः।

मां न गणयन्ति तावकेषु कथम्,
हन्त जातोऽस्मि रे परेषु कथम्।

नाहमेष क्वचिद् गतो दूरे
वीक्षसे मां पलायितेषु कथम्।

तुङ्गसौधे कृतस्थितेस्तव रे,
दृष्टिरेष्वस्तु भूगतेषु कथम्।

येषु वैफल्यमेव वैफल्यम्,
तेऽपि जाताः फलान्वितेषु कथम्।

पीडितानामियं तु पीडैका,
न त्वया भाविताः स्वकेषु कथम्।

ये त्वदर्हन्ति हन्त रे छायाम्,
स्थापितास्ते त्वयाऽऽतपेषु कथम्।

ये त्वया दृग्वशीकृताः सन्ति,
तेऽपि तिष्ठन्ति याचकेषु कथम्।

नव लभ्येत नैव लभ्येत,
दृक् त्वदीयाऽस्तु पीडितेषु कथम्।

मानितास्त्वत्सदःसु वाचालाः,
शङ्कसे मूकतां गतेषु कथम्।

धार्मिकाणां क एवमधिकारः,
पायिनो नैव त्वत्परेषु कथम्।

निरीक्षे केशपाशं रे श्लथं ते,
परीक्षे प्रेमपाशं रे श्लथं ते ।

इदानीं कारणं किं मेऽधिरथ्यम्,
सुसज्जं स्वागतं वीक्षे रथं ते ।

वराकाणां हि रिक्तानां कथा का,
समृद्धा अग्रतस्ते न प्रथन्ते ।

व्यथाया हेतुरास्तां वा न वाऽऽस्ताम्,
व्यथाजीवातवस्त्वेवं व्यथन्ते ।

किमासीत् कारणं का त्रुटिरिहासीत्,
इतः कलयामि चित्तं सव्यथं ते ।

उदीते प्रत्यभिज्ञानं न किञ्चित्,
पुरेव प्रेक्षितं न मुखं कथं ते ।

परीक्षायां स्थितः स्या दर्शयेद् रे,
समागत्यैव कश्चित् सत्पथं ते ।

कदाचित् स्नेहमाविर्भावयेद् वा,
विनाश्यैवाशु कश्चिन्मन्मथं ते ।

दृष्टिपातो नैव यावत् तावको जीवाम्यहम्,
योऽस्मि सोऽस्मि सुदूरवर्तिनि ! तावको जीवाम्यहम् ।

नैव जातौ हन्त पक्षौ नाक्षिणी उन्मीलिते,
नीडगः क्षुधितस्त्वदीयः शावको जीवाम्यहम् ।

न त्वमेष्यसि शीघ्रमिह चेद् यामि रे प्रशमं क्षणम्,
भस्मनाऽऽवृत एष कश्चित् पावको जीवाम्यहम् ।

भाग्यमेतदितो मदीयं धन्यवादस्त्वत्कृते,
त्वत्पदाम्बुजयोः कृतः सन् यावको जीवाम्यहम् ।

न क्षमश्चलितुं विचिन्वंस्त्वां मृगाक्षि ! वने वने,
कण्टकैः क्षतविक्षतः सन् धावको जीवाम्यहम् ।

हन्त वाचालास्त्वयेमे तावकाः सम्मानिताः,
मूक एष उपेक्षितस्ते स्तावको जीवाम्यहम् ।

का स्मृतिश्च जिजीविषेयं का च भारः सर्वथा,
त्वद्वियोगे पश्य विस्मृतभावको जीवाम्यहम् ।

महान्तं निवारय सुतर्षं मदीयम्,
कृपा नाशयेत् ते सुतर्षं मदीयम् ।

महान् बाधको युष्मदस्मत्प्रसङ्ग,
जहीमं कथञ्चिद् विमर्शं मदीयम् ।

अयं कृत्रिमो वाऽथवाऽकृत्रिमोऽस्ति,
परीक्षस्व यत्नेन हर्षं मदीयम् ।

स्मितं तेऽधराग्रप्रसूतं कदाचित्,
विनष्टं विदध्यादमर्षं मदीयम् ।

त्वयि प्रस्थितायां सुदूरप्रदेशम्,
न वर्षा मदीया न वर्षं मदीयम् ।

निरीक्ष्यैव लज्जामिदानीं गतोऽस्मि,
स्वरूपं त्वदादर्शदर्शं मदीयम् ।

सम्भवेद् वा कः शुभेच्छुः सर्वथा रिक्तस्य ते,
हस्तमवलम्वेत कः पततः क्वचिद् रिक्तस्य ते।

सर्व एव जना जगति सन्ति स्वपीडापीडिताः,
को व्रजेत् पीडानिवारकतां हि सम्पृक्तस्य ते।

केवलस्य मिलन्ति माधुर्यस्य सर्वे ग्राहकाः,
कः समीपमुपैतु लोके सर्वथा तिक्तस्य ते।

ये हि मन्ये छायया परिवेष्टितास्तेषां जगत्,
आतपे तप्तस्य कः स्यात् स्वेदसंसिक्तस्य ते।

हन्त को गाथां त्वदीयां नीरसामाकर्णयेत्,
जीवनं याप्येत लोके सर्वथा गुप्तस्य ते।

ये हि धूलिगतान् द्विषन्ति महत्सु ते हि प्रतिष्ठिताः,
हन्त धूलिभरेण कः स्यात् स्वः सदा लिप्तस्य ते।

अङ्कुशानामेव पातांस्ते लभन्ते साम्प्रतम्,
ये गतानुगता जगत्यां सन्ति रे दृप्तस्य ते।

त्वां त्वदीया स्व यास्यन्तीह त्यक्त्वा दूरतः,
नैवमुद्बोधं विदध्यात् कोऽपि संसुप्तस्य ते।

—३—

तन्नवीनं न यद् गीयताम्,
गीतमेतत्पुनर्गीयताम् ।
त्वद्वियोगे मया शोभने,
कैरुपायैर्दिनं नीयताम् ।
सर्वमेतत् त्वदीयं यतः,
किञ्च तुभ्यं मया दीयताम् ।
अस्तु रामोऽस्तु कृष्णोऽथवा,
रोचते यः स रे चीयताम् ।
प्राप्तदौर्बल्ययोः स्कन्धयोः,
भार एवं कथं नीयताम् ।
मादकं रे 'तदीयं स्मितम्,
केवलं पीयतां पीयताम् ।
तन्महत्त्वं समुद्रोपमम्,
स्वे च बिन्दौ कथं मीयताम् ।
सूर्यमालक्ष्य यः स्पर्धते,
तेन नीडे कथं लीयताम् ।
दूरतो येन गन्तव्यमाः !
तेन श्रान्तेन किं स्थीयताम् ।
यस्य रूपं न किञ्चित् ततः,
केन वा चित्तमाधीयताम् ।

सर्वमेतन्न किं सुन्दरम्,
सुन्दरान्निर्गतं सुन्दरम्।

नीलनीलं नभः सुन्दरम्,
पीतपीता धरा सुन्दरम्।
तुङ्गतुङ्गो गिरिः सुन्दरम्,
निर्झरन् निर्झरः सुन्दरम्।
शुष्कमेतत् सरः सुन्दरम्,
वारिपूर्णं सरः सुन्दरम्।
स्थाणुरेकः स्थितः सुन्दरम्,
हृद्यमुद्यानकं सुन्दरम्।
यत्तदीयं यथा सुन्दरम्,
तन्मदीयं तथा सुन्दरम्।
नीडसुप्ता खगी सुन्दरम्,
धावमानो मृगः सुन्दरम्।
कुन्तलाश्चूर्णिताः सुन्दरम्
नीरदा घूर्णिताः सुन्दरम्।
सिक्तसिक्तं वपुः सुन्दरम्,
रिक्तरिक्तं मनः सुन्दरम्।
यस्य लग्नं मनो यत्र रे,
तत्कृते हन्त तत् सुन्दरम्।

समन्ताद् यन्मया दृष्टं निमीलन्त्या दृशा दृष्टम्,
अदृष्टं वा सुदृष्टं वा समं तद् यन्मया दृष्टम् ।

कठोराणां कठोरत्वं मृदूनां मार्दवं दृष्टम्,
कठोरत्वं मृदुत्वं वा न तत्प्रकृतेर्मया दृष्टम् ।

कठोराणां मृदुत्वं वा मृदूनां वा कठोरत्वम्,
न तद् दृष्टं त्वया मन्ये जगत्यां यन्मया दृष्टम् ।

त्वदीयं सुस्मितं दृष्टं त्वदीयं प्रेक्षितं दृष्टम्,
त्वदीयं किं न किं मुग्धे विलसितं यन्मया दृष्टम् ।

न गोप्यं वा प्रकाश्यं वा किमप्यस्त्यावयोर्मध्ये,
मदीयं यत्त्वया दृष्टं त्वदीयं तन्मया दृष्टम् ।

त्वदीयश्चेत् प्रसादो हन्त पश्यन्तीह जन्मान्धाः,
अभावे त्वत्प्रसादस्यैव किञ्चिन्नो मया दृष्टम् ।

विचित्रं किञ्चिदेव प्रेम्णि ते साधारणीकरणम्,
यदेवास्मिंस्त्वया दृष्टं तदेवास्मिन् मया दृष्टम् ।

किन्नु ते दीयतामुत्तरम्,
अस्मि प्रश्नस्त्वमस्युत्तरम् ।

गन्ध आयाति कस्मादहो,
उत्तरीयं तवास्त्युत्तरम् ।

यस्य मौनं भवेद् भाषितम्,
तस्य देयं किमस्त्युत्तरम् ।

अस्मदस्तित्वमन्धं तमः,
रश्मयस्त्वद्दृशोरुत्तरम् ।

कत्युपागत्य सन्ध्या गताः,
नागतं तत्करादुत्तरम् ।

हन्त के के न पृच्छन्ति माम्,
दीयतां कस्य कस्योत्तरम् ।

यस्य जायेत चित्ते हठः,
नास्ति नास्त्येव तस्योत्तरम् ।

यो नहीत्येव सम्भाषते,
उत्तरं तस्य नास्त्युत्तरम् ।

धीराः स्वलम्यमेव लभन्ते शनैः शनैः,
सौख्यं त एव हन्त लभन्ते शनैः शनैः ।

यैर्पितं स्वमेव परेषां कृते मुदा,
ते लोकचेतसीह रमन्ते शनैः शनैः ।

ते भाजनं भवन्ति कृपायाः स्वभावतः,
ये दुःखमाप्नुवत्सु दयन्ते शनैः शनैः ।

स्वल्पास्त एव सन्ति सुजाता जगत्सु ये,
स्वस्यास्त्रुटेः कृते तु व्यथन्ते शनैः शनैः ।

साफल्यमेव ते हि लभन्ते विशेषतः,
उत्साहिता य एव यतन्ते शनैः शनैः ।

श्रान्ता भवन्ति ये न चलन्तः सुदूरतः,
मार्गे हि ते पदेन क्रमन्ते शनैः शनै ।

शक्ता हि यत्र नैव वलन्ते विधित्सया,
तत्रैव दुर्बलास्तु क्षमन्ते शनैः शनैः ।

स्नेहस्य कोऽपि पात्रमितो नैव लभ्यते,
अस्मादृशाश्चिरेण त्रपन्ते शनैः शनैः ।

क्व चिन्त्योऽहं कदाचिन्मामकीनैः,
विधातः पीडितोऽहं मामकीनैः ।
जनानां भ्रान्तिरेषा हन्त जाता,
त्वदीयैर्वा विलासैर्मामकीनैः ।
वृथेयं सन्तता तृष्णा मदीया,
न सेत्स्यत्येव कार्यं मामकीनैः ।
प्रवाहं तैः सुधाया आनयद्भिः
इदानीं वञ्चितोऽहं मामकीनैः ।
मदीयाया व्यथाया हन्त शान्तिम्,
जना जानन्ति हसितैर्मामकीनैः ।
भविष्यत्येव योगस्तेऽपि तैर्वा,
इतो यैर्वञ्चितोऽहं मामकीनैः ।
तदैवोन्मीलितं सत्यं ननु स्यात्,
मिलेयुस्तावकीना मामकीनैः ।
घटेत क्वेव तैर्मे सामरस्यम्,
न विश्वास्योऽहमेभिर्मामकीनैः ।
क्व ते हसितस्य योगस्तावदास्ताम्,
विविक्तैरेव रुदितैर्मामकीनैः ।
व्यथाया जन्म चित्ते तावकीने,
क्व दग्धैरस्तु नीडैर्मामकीनैः ।
क्व तेषां नेत्रकोणेष्वश्रुजन्म,
उदन्तैरस्तु कैश्चिन्मामकीनैः ।

तदीयमिङ्गितमस्मत्परं कुतोऽपि भवेत्,
विधेर्विचेष्टितमित्थं शुभं कुतोऽपि भवेत् ।

शनैः शनैः पदमाधेहि नूनमुद्याने,
हृदत्र कस्यचिदस्मिन् स्थितं कुतोऽपि भवेत् ।
विषं भवेदमृतं कस्यचित् तथा चित्तम्,
कठोरमत्यतिमृदुतां गतं कुतोऽपि भवेत् ।
व्यथाकथां न मदीयां शृणुष्व किञ्चन रे,
क्षणं त्वदन्तरमुत्पीडितं कुतोऽपि भवेत् ।
परिश्रमेण जनः स्वामुपैति संसिद्धिम्,
सहायमक्षि तदुन्मीलितं कुतोऽपि भवेत् ।
मया न किञ्चिदिदं तत्पुरोऽपि वक्तव्यम्,
यदिष्टसाधनमेषा स्थितिः कुतोऽपि भवेत् ।
मतं न याचितकं यस्य कस्यचित् पुरतः,
लघुत्वमेव सुलब्धं यतः कुतोऽपि भवेत् ।
मया तु निश्चितमेकाकिनैव गन्तव्यम्,
पथि स्वतो घटनं केनचित् कुतोऽपि भवेत् ।
न दुर्दिनं मम मेघेषु किञ्चिदायत्तम्,
तदिङ्गितं न विरुद्धं यतः कुतोऽपि भवेत् ।
मधु त्वदीयकरात् किञ्चिदस्तु मे लब्धम्,
कथञ्चिदेव भवेद् वा यतः कुतोऽपि भवेत् ।

न मुग्धाः शेरते जाग्रति न ये वा,
न तेषां मादृशां सुप्तप्रबुद्धम् ।

मणौ लोष्टे न येषां भेदबुद्धिः,
समं तेषां मतं सुप्तप्रबुद्धम् ।

तवोद्यानस्य मुग्धे कैव रीतिः,
प्रसूनानामरे सुप्तप्रबुद्धम् ।

क्वचिन्नैराश्य आशायां क्वचिद् वा,
विकीर्णं जीवनं सुप्तप्रबुद्धम् ।

किमेतन्नाटकीयं नास्ति दृश्यम्,
मृषा-सत्यं तथा सुप्तप्रबुद्धम् ।

समन्तात् त्वद्वियोगे पीडितं माम्,
प्रबुद्धा जानते सुप्तप्रबुद्धम् ।

त्वदीये मन्दिरे गीतं न वाद्यम्,
किमेतद् दृश्यते सुप्तप्रबुद्धम् ।

जनुस्तस्यैव फलवज्जातमन्ते,
श्रुतं येन त्वदास्याद् भाषितं ते।

रहस्यं तच्च लावण्यस्य किं ते,
लघीयो यत् त्वदास्ये शङ्कितं ते।

कण: कस्मात् सुधाब्धेस्तेन लब्ध:,
त्वदीयैकाधराग्रे यत् स्मितं ते।

निशायां व्योम्नि यत् तारा: प्रथन्ते,
स्मितोद्यानस्य तत् किं पुष्पितं ते।

मदीयानां स्तुतानां भाषितानाम्,
समाधानं वच: स्निग्धं मितं ते।

त्वदर्थं किं मया शक्यं विधातुम्,
मदर्थं शोभने यद् यत् कृतं ते।

स्वरूपं मामकं भूयोऽपि योगे,
क्वचिन्न स्यात् कदाचिद् विस्मृतं ते।

न शापस्यावधिस्तावन्मम स्यात्,
भवेद् यावन्न रूपं वीक्षितं ते।

स्फुटीभूतं तदेव प्रेम भूत्वा,
मदीये हृत्स्थले यद् रोपितं ते।

गुरूणामग्रतो नम्रेण भाव्यम्,
इदं नित्यं स्मराम: शिक्षितं ते।

तव प्रीतिं परं शङ्के न शङ्के,
निमीलन्तीं दृशं शङ्के न शङ्के।
स्मितेनार्द्रैरपाङ्गैः साचि साचि,
त्वदीयं प्रेक्षितं शङ्के न शङ्के।
सलीलां ते स्फुरत्सलिलां सुनीलाम्,
दृशं सत्कज्जलां शङ्के न शङ्के।
प्रधावन्तीं कशाघातात् प्रति त्वाम्,
स्वकीयां कल्पनां शङ्के न शङ्के।
न किञ्चित् कष्टमथ कष्टं तु किञ्चित्,
तव स्निग्धस्मितं शङ्के न शङ्के।
तव द्वारेऽवरोधो हन्त कोऽयम्,
त्वदीयां भावनां शङ्के न शङ्के।
न वार्यन्ते न सार्यन्ते त्वयेमे,
कटाक्षांस्तावकान् शङ्के न शङ्के।
परीक्ष्यन्ते न शिक्ष्यन्ते न यत्ते,
त्वदीयांस्त्वद्गतान् शङ्के न शङ्के।
परिश्राम्यन्ति विश्राम्यन्ति नैते,
कियत् ते त्वत्पराः शङ्के न शङ्के।
विशालायां धरण्यां केचिदेते,
मदीया इत्यहं शङ्के न शङ्के।
दरिद्रेणापि यद् दीयेत प्रीत्या,
तदाढ्येनापि किं शङ्के न शङ्के।

वाहिनी याति स्वभङ्गैः साकम्,
यान्ति वीरा हि तरङ्गैः साकम् ।

यस्तु पारं यियासति त्वरितम्,
स्पर्धते सोऽपि तरङ्गैः साकम् ।

यस्य चित्ते नभोविहारेच्छा,
स प्रवर्तेत विहङ्गैः साकम् ।

यस्य चित्तं वनावनौ रमते,
सोऽवतिष्ठेत कुरङ्गैः साकम् ।

तत्सुगीतं न शोभते ननु यत्,
सङ्गतं स्यान्न मृदङ्गैः साकम् ।

यच्च ते दूरमस्ति गन्तव्यम्,
मैत्र्यमाधेहि तुरङ्गैः साकम् ।

चेदभीष्टा तव स्थितिर्निम्ने,
नाक्षिणी मेलय शृङ्गैः साकम् ।

प्रेमबन्धश्च हन्त जिज्ञासुः,
तिष्ठ तिष्ठापि च भृङ्गैः साकम् ।

स्वं समर्प्यैव सार्थकैः सद्भिः,
सन्निधेह्येहि पतङ्गैः साकम् ।

मदीयं जीवनं किं प्रीतिरेषा,
न जाने कुत्र जाता प्रीतिरेषा।

कलायाः के न के सन्ति प्रकाराः,
करोत्यार्द्रं परं मां गीतिरेषा।

न चेष्टन्ते य एते पूरितास्ते,
दरिद्राश्चेष्टमाना रीतिरेषा।

न रागं नेत्रयोस्ते किञ्चिदीक्षे,
त्वदीया रागशीले, नीतिरेषा।

स एव त्वां विजानातीह यस्त्वाम्,
न जानात्येव तन्मेऽधीतिरेषा।

निवृत्ताः किञ्चिदप्राप्य त्वदीयाः,
तव द्वारात्, न काचिदनीतिरेषा।

कदाचिद् युष्मदस्मद्भेदभावम्,
विदध्यान्नष्टमद्य सपीतिरेषा।

असि त्वं केन दुष्यन्तेन विद्धा,
तवाक्ष्णोः काऽपि लक्ष्या भीतिरेषा।

परस्मिन् वा कथं स्यात् प्रत्ययो मे,
यदात्मन्येव नैव प्रत्ययो मे ।

मदीयो दृष्टिसङ्कोचः स मन्ये,
त्वयीत्थं नैव किञ्चित् प्रत्ययो मे ।

अनास्थेयं हि तद्दृष्टेश्चलत्वम्,
सुजातस्तादृशेष्वप्रत्ययो मे ।

सति स्नेहे कुतश्चित् छिन्नमूले,
न कश्चित् प्रत्ययो वाऽप्रत्ययो मे ।

स्वभावस्यात्मनः किं वा वदेयम्,
न प्रत्येयेषु तेषु प्रत्ययो मे ।

उदाराणामभावो नास्ति लोके,
तथाप्युत्पद्यते न प्रत्ययो मे ।

मयि स्निग्धे न कश्चित् प्रत्ययस्ते,
त्वयि स्निग्धेऽपि नैव प्रत्ययो मे ।

न यावज्जायते त्वादृशि सुतोषः,
कुतः स्यादेव तावत् प्रत्ययो मे ।

कृपादृष्टिस्त्वदीया स्यात् कदेयम्,
न देयं रे पुनर्दुःखं न देयम्।

वलद्रागा हृदीयं काऽपि वीणा,
मदीये झङ्कृतिं तनुते सदेयम्।

मदीया पानपात्री रिक्तरिक्ता,
सुपूर्णा त्वत्कराद् भविता कदेयम्।

अहं यल्लाभतः स्यामुन्मदोऽलम्,
फलं रे तत् त्वया मह्यं न देयम्।

श्रुती मे वञ्चिते येनाद्य यावत्,
तदेवाद्य त्वया गेयं नु गेयम्।

मदीयं हार्दिकं विनिवेद्यमेतत्,
दरिद्रेभ्यस्त्वया देयं नु देयम्।

त्वया छायार्पिता मन्ये बहुभ्यः,
प्रतप्ते मय्यहो छाया न सेयम्।

त्वदीयादस्ति रूपान्नातिरिक्तम्,
मयाऽऽधाय स्वपात्रे यच्च पेयम्।

त्वदीयानां कृतेस्माकं जगत्याम्,
न किञ्चद् ग्राह्यमस्त्यथवा न हेयम्।

महीयो यच्च रूपं ते ममास्याम्,
लघीयस्यां हि बुद्धौ तन्न मेयम्।

प्रबोधयन्ति जना मां निवारयन्तीमे,
प्रयान्तमन्तिके दीपस्य वारयन्तीमे।
यदाऽस्मि निर्गत एवंविधं हि संकल्प्य,
स्वबान्धवा बत हस्तौ प्रसारयन्तीमे।
मृतस्य कैव नु लज्जा ततस्तु का हानिः,
कथं नु वाससा वक्त्रं प्रवारयन्तीमे।
निपीतवानहमद्यप्रभृत्यहो न मधु,
तथापि मद्यप इत्याः ! प्रचारयन्तीमे।
प्रतारितो न मया हन्त कोऽपि लोकेऽस्मिन्,
तथापि मां कथमेवं प्रतारयन्तीमे।
लवोऽपि नास्ति कृपायाः कृपालवो ह्येते,
उपाधिमीदृशमद्यापि धारयन्तीमे।
जनस्य भाग्यविधातार एत एव मताः,
प्रकर्तुमन्यथा कर्तुश्च पारयन्तीमे।
वहामि मूर्ध्नि न चाज्ञामतोऽपराद्धं माम्,
दयालुतैवममीषां न मारयन्तीमे।
पतामि हन्त न जाने कथञ्चिदाकूतम्,
मदीयपातमुदारा निभालयन्तीमे।

चित्तेऽन्यदेव कोविदाः सन्धाय चक्षते,
यत्किञ्चिदेव चक्षते सन्धाय चक्षते ।

येषामभूत् तव स्थितेर्ज्ञानं यतोऽधुना,
तस्मै तवैत आदृता गन्धाय चक्षते ।

मुक्ता अपीह केचिदिमे सत्वराः क्षणम्,
त्वद्दृष्टिरश्मिभिः परं बन्धाय चक्षते ।

येन त्वदीयमार्गरहस्यं निरीक्षितम्,
तस्मै सलोचनाः परमन्धाय चक्षते ।

शिबिका तवैव येन समन्तादहो धृता,
तस्मै जना जनस्य न स्कन्धाय चक्षते ।

येषां न मुक्तकेऽपि गतिर्हन्त मादृशाम्,
तेऽपि त्वदीक्षिता हि प्रबन्धाय चक्षते ।

—५—

तव द्वारि श्रीविशाले ननु भिक्षितुं समीहे,
तदिदं विहाय स्थानं क्व निरीक्षितुं समीहे ।

मम नैव सार्थकत्वं नयनद्वयस्य किञ्चित् ।
क्षणमेष जन्मनि त्वामिह वीक्षितुं समीहे ।

स्फुटमिङ्गितानि वेत्तुं तव नास्मि रे समर्थः,
भाषां भ्रुवोर्नवीनां तव शिक्षितुं समीहे ।

न त्वाम्प्रतीह वाच्यं मम साम्प्रतं तथापि,
पत्रं लिखेति वाचं तव रक्षितुं समीहे ।

कियदर्पयन्ति लब्धान्मधुनः परेभ्य एते,
तव तर्पितानुदारान् हि परीक्षितुं समीहे ।

मम भावनेह तुभ्यं मृदु किञ्चिदर्पणीयम्,
हृदयं स्वमेव तस्मान्ननु तक्षितुं समीहे ।

मज्जन्ति रे तटस्था इति यत् त्वयोक्तमासीत्,
तट एव संस्थितस्तत् परिलक्षितुं समीहे ।

त्वदीयस्याननस्य किमेव वाच्यम्,
प्रफुल्लत्काननस्य किमेव वाच्यम्।

त्वदीयस्यास्य गन्धाढ्यस्य वपुषः,
विनिन्दच्चन्दनस्य किमेव वाच्यम्।

तरङ्गोद्भिन्ननीलसरोवरस्य,
त्वदक्ष्णोः स्पन्दनस्य किमेव वाच्यम्।

स्वसंख्यायां कदाचित् षोडशस्य,
त्वदङ्गे मण्डनस्य किमेव वाच्यम्।

दृशोरुद्वर्तितैस्तै रश्मिजालैः,
हृदो मे बन्धनस्य किमेव वाच्यम्।

त्वया सार्धं समुद्यत्सामरस्ये,
शुभे सम्भाषणस्य किमेव वाच्यम्।

त्वदीयैः सुस्मितैर्विकसत्प्रसूनैः,
क्षणं सम्माननस्य किमेव वाच्यम्।

त्वदीयभ्रूधनुर्विलसच्छराणाम्,
त्वया विनिपातनस्य किमेव वाच्यम्।

त्वदीयस्यास्य मां वीक्ष्यैव तूर्णम्,
स्ववक्त्राच्छादनस्य किमेव वाच्यम्।

तिष्ठ प्रस्थातुकामाऽसि चेत्,
किञ्चिदुत्थातुकामाऽसि चेत् ।

गीतपूर्वं न तद् गीयताम्,
गेयमुद्गातुकामाऽसि चेत् ।

पश्य मित्रस्य दृष्ट्या नु माम्,
किञ्च सन्धातुकामाऽसि चेत् ।

पाययस्व स्वहस्तान्मधु,
मत्करात् पातुकामाऽसि चेत् ।

वार्यतामश्रु नेत्रान्मम,
स्वस्मितं दातुकामाऽसि चेत् ।

मीयतां मे लघुत्वं न रे,
प्रेम मे मातुकामाऽसि चेत् ।

घ्रेयमेतन्मदस्तित्वकम्,
किञ्चिदाघ्रातुकामाऽसि चेत् ।

न त्वया हेय एषोऽस्मि रे,
छिन्धि मां हातुकामाऽसि चेत् ।

दीयतां वस्तु किञ्चित् करात्,
किञ्चिदादातुकामाऽसि चेत् ।

नैव याता निवर्तन्त आः!
याहि नो, यातुकामाऽसि चेत् ।

गतानां नः समानं वा स्थितानाम्,
न भेदो जीवितानां संस्थितानाम् ।

त्वदीयानां दृशां वा जानते के,
विभेदं सस्मितानां विस्मितानाम् ।

न किञ्चित्पीडितो यः स क्व पश्येत्,
विभेदं चीत्कृतानां सीत्कृतानाम् ।

न हि ज्ञायेत कैश्चित् स्वापशीलैः,
दशेयं कुण्ठितानां लुण्ठितानाम् ।

कदाचिद् प्राप्यतां कालोऽनुकूलः,
समेषां मुञ्चितानां लुञ्चितानाम् ।

प्रसुप्तेभ्यः कदाचित् स्मारयेस्त्वम्,
स्वराणां झङ्कृतानां टङ्कृतानाम् ।

श्रुता व्यथयत्यवश्यं त्वामिदानीम्,
कथेयं दण्डितानां खण्डितानाम् ।

कदाचिन्नैव मत्तेष्वेषु ते स्यात्,
प्रभावो गर्जितानां तर्जितानाम् ।

केऽपि धन्याः सदैव सिध्यन्ति,
हन्त सर्वेऽपि नैव सिध्यन्ति।

कापि येषां भवेन्न संसिद्धिः,
तेऽपि दृष्टास्त्वयैव सिध्यन्ति।

नैव यातासि गोचरं येषाम्,
तेऽपि सिद्धा वृथैव सिध्यन्ति।

त्वद्गतास्त्वद्गृहाङ्गणप्राप्ताः,
भिक्षवो भिक्षयैव सिध्यन्ति।

येऽप्यसिद्धाः समस्ततस्तेऽपि,
त्वत्पराः सर्वथैव सिध्यन्ति।

कोऽपि नो दृष्टवानितो यांस्ते,
वीक्षितास्त्वद्दृशैव सिध्यन्ति।

येषु कश्चिन्न भावबन्धस्ते,
सर्वथा ते मुधैव सिध्यन्ति।

यद्यहो तान्न वीक्षसे मुग्धे !
त्वद्गतास्ते कदैव सिध्यन्ति।

तेऽप्युपेक्ष्या न हि त्वया यदपि,
केचिदप्यन्यथैव सिध्यन्ति।

साध्यं न किञ्चिदन्यदिह प्रीतिमन्तरा,
स्वं जीवनं न किञ्चिदिह प्रीतिमन्तरा।

महतो धनस्य लाभ इतः किं विमृश्यताम्,
शून्यं भवेदिदं हि जगत् प्रीतिमन्तरा।

यत्रैव सम्मिलन्ति हि नद्यः परस्परम्,
तत्रापि दृश्यमेव किमु प्रीतिमन्तरा।

नीडस्थिता खगीयमहो कं प्रतीक्षते,
किं वेत्ति किञ्चिदन्यदियं प्रीतिमन्तरा।

शशिना सहैव याति न किं कौमुदी जडा,
तद् दृश्यमस्ति किन्नु वद प्रीतिमन्तरा।

मेघेन सार्धमेव गतेयं विलीनताम्,
मूका तडित् किमाह वद प्रीतिमन्तरा।

संयोजयेत् तया च सह त्वां हि वस्तु यत्,
तन्नाम किं त्वमेव वद प्रीतिमन्तरा।

यद् व्याकुलोऽसि चेतसि मन्ये पिपासया,
तन्नास्ति नास्ति नास्ति तव प्रीतिमन्तरा।

एकेन येन कश्चिदितो धन्यतां व्रजेत्,
तन्नास्ति कश्चिदन्यदिह प्रीतिमन्तरा।

यत्प्राप्य महीयस्त्वमुपैतीह लघीयान्,
तन्नास्ति किञ्चिदन्यदिह प्रीतिमन्तरा।

दैवेऽनुकूल एव हि सिध्यत्यभीप्सितम्,
सिद्धेऽप्यभीप्सिते न हि सिध्यत्यभीप्सितम् ।

कालाद् बहोः प्रतप्ततमाया भुवः क्वचित्,
धूमस्य सञ्चयेन न सिध्यत्यभीप्सितम् ।

पात्रे प्रपूरितेऽपि यतस्ते क्षणं न दृक्,
निपतेत् क्व तस्य सम्प्रति सिध्यत्यभीप्सितम् ।

सम्भाषणक्षणेषु कदाचित् तवानने,
रोषो न यावदस्ति, न सिध्यत्यभीप्सितम् ।

मद्भावना खगी त्वयि विश्रान्तिमीहते,
तस्यास्तव स्मितेन हि सिध्यत्यभीप्सितम् ।

मन्त्रीस्त्वदीयहस्तगता स्वेच्छया चर,
सिद्धे त्वदीप्सिते मम सिध्यत्यभीप्सितम् ।

व्यर्था न किञ्चिदस्ति हि वैयाकुली मम,
नभीप्सिते सिद्धे मम सिध्यत्यभीप्सितम् ।

पात्रं तृषायुतस्य विधेहीह पूरितम्,
मधुरेण भाषितेन न सिध्यत्यभीप्सितम् ।

यद्यप्यमी पिपासव आस्त्वद्गतासवः,
मात्रेण जीवनेन न सिध्यत्यभीप्सितम् ।

तस्याः करात कदाचन कुत्रापि मादृशाम्,
ताम्बूललाभतोऽपि च सिध्यत्यभीप्सितम् ।

तन्नास्ति वस्तु यद् हि भवेत् तुभ्यमदेयम्,
सर्वं त्वदीयमेव, न रे तुभ्यमदेयम्।

हृत् तुभ्यमदेयं न मनस्तुभ्यमदेयम्,
यद् वा मदीयमस्ति न तत् तुभ्यमदेयम्।

ग्राह्यं त्वदस्ति हन्त मया किन्न किन्न रे,
तन्नास्ति यन्मदीयमरे तुभ्यमदेयम्।

नैवावयोर्विदन्ति जना भावबन्धनम्,
अग्राह्यमस्ति ते किमु मे तुभ्यमदेयम्।

यद् यद् रहस्यमस्ति न तत् तत् प्रकाश्यताम्,
जानासि किं मदीयमरे तुभ्यमदेयम्।

किञ्चित् प्रकाशयात्मन एवं यदीप्सितम्,
एकस्त्वमेव मे किमु मे तुभ्यमदेयम्।

निर्णेतुमत्र नैव मया शक्यतेऽधुना,
देयं हि किञ्च तुभ्यमरे तुभ्यमदेयम्।

यः सर्वथैव भावनया स्वीयतां गतः,
तस्मै किमेव मामकं यत् तुभ्यमदेयम्।

चित्ते विशङ्कितं तव मां पीडयत्यलम्,
स्वाभीप्सितं प्रकाशय किं तुभ्यमदेयम्।

—६—

मया माननीयं तदीयं निमिषितम्,
कदाचिद् विलसितं कदाचिन्निमिषितम् ।

कदाचिच्चलन्नेत्रकोणेन जातम्,
कदाचित् स्मितेनैव लसितं निमिषितम् ।

यदेवेङ्गितं वा च यच्चेष्टितं वा,
तदीयं तदेवास्ति ललितं निमिषितम् ।

अरे तन्निमिषितस्य भाषैव भिन्ना,
विदग्धैर्विवेच्यं तदीयं निमिषितम् ।

क्वचित् पुष्पवर्षास्तदीयं निमिषितम्,
क्वचिद् बाणपातस्तदीयं निमिषितम् ।

दिनस्यातपोऽयं तदीयं निमिषितम्,
स्फुरच्चन्द्रिकाऽसौ तदीयं निमिषितम् ।

झटित्येव मधुरं झटित्येव तिक्तम्,
मदीयं हि काम्यं तदीयं निमिषितम् ।

जनो हन्त सामान्यतो भ्रान्तिमेति,
क्व तस्या विलसितं क्व तस्या निमिषितम् ।

लभन्तेऽभिलषितं यतो मुग्धमुग्धाः,
विदग्धान् धुनीते तदीयं निमिषितम् ।

स्फुरत्सौमनस्यं मिलत्सामरस्यम्,
तदीयं विलसितं तदीयं निमिषितम् ।

जगत्यां नैव यस्यास्ते सहायः,
त्वमेव त्वं नु यस्यासे सहायः।

त्वदीयाद् वीक्षितादन्यः क एव,
कठोरायां जगत्यां नः सहायः।

खगानां स्वैरमुड्डयनार्थमन्यत्,
नवीनं नः प्रदेयं रे विहायः।

न कश्चिद् हन्त मे दृग्गोचरोऽभूत्,
विपन्नं स्वागतीकुरुते मुदा यः।

स कोऽपि स्यान्मदीयः कोऽपि नासौ,
मयीत्थं हन्त सदिग्धे मुधा यः।

शयानो यत्र तत्रासौ मिलेद् वा,
विकीर्णो वा कुतः शेते क्षुधा यः।

कृते तस्यास्ति वक्तव्यं न किञ्चित्,
प्रदीप्तो वाचि मेऽभूद् वा क्रुधा यः।

स एवास्माकमादर्शो जगत्याम्,
प्रवृत्तः प्रेर्यमाणो वा हृदा यः।

घनीभूतं तमस्तं नावरुन्धे,
स्वमार्गे सम्प्रवृत्तो वा सदा यः।

प्रसादं तस्य कोपं वाऽपि तस्य,
बहु मन्ये मदीयोऽभूत् पुरा यः।

मदीयं जीवनं यत् त्वय्यधीनम्,
न किं मां पश्यसि त्वं त्वय्यधीनम्।

तव द्वारि स्थितं विनिवारयन्ति,
जना जानन्त्यमी मां त्वय्यधीनम्।

द्रुतं वा स्यात् कदापि विलम्बितं वा,
गतं रे मामकीनं त्वय्यधीनम्।

मदीयं यच्च रुदितं यच्च हसितम्,
असन्दिग्धं हि तद् रे त्वय्यधीनम्।

विषं वा यच्च रोचेतामृतं वा,
तदेवं देहि मह्यं त्वय्यधीनम्।

कुतोऽस्तित्वं मदस्तित्वस्य किञ्चित्,
मदीयं सर्वमपि यत् त्वय्यधीनम्।

यः सभायां सभाजितः सोऽहम्,
यो विजेता त्वया जितः सोऽहम् ।

स्वस्य विषये मया किमाख्येयम्,
यः स्वकीयैः पराजितः सोऽहम् ।

गम्यतामित्यहो निशम्यापि,
द्वारि ते यो विराजितः सोऽहम् ।

नेत्रयोर्वीक्षितः स्मितैर्मधुरैः,
यस्त्वयाऽहो द्विधा जितः सोऽहम् ।

वीरवर्यान् पराजयस्व सखे,
निर्बलः किं त्वया जितः सोऽहम् ।

यश्च शक्यस्त्वया मुदा जेतुम्,
हन्त मुग्धे क्रुधा जितः सोऽहम् ।

दया नास्ति तस्मिन् कृपा नास्ति तस्मिन्,
कियद् वा परीक्षे क्षमा नास्ति तस्मिन् ।

न कोऽपि स्मितेनास्य भ्रमितः क्षणं स्यात्,
विपन्ने जने हि व्यथा नास्ति तस्मिन् ।

वियुक्ता जना यत्र निवसन्ति लोके,
कुतो हन्त निद्रा, निशा नास्ति तस्मिन् ।

क्षणं प्रीतिरुत्पद्यते यस्य चित्ते
निजोऽयं परोऽयं भिदा नास्ति तस्मिन् ।

क्षुधापीडिते कोऽपि किं सव्यथः स्यात्,
स्वयं वाऽनुभूता क्षुधा नास्ति तस्मिन् ।

कथं वा मदीयं शुभं कोऽपि कुर्यात्,
जने स्वेऽपि दृष्टिः शुभा नास्ति तस्मिन् ।

सुहृद्वर्य हे वासरान् यापय स्वान्,
न तुभ्यं कदाचित् स्पृहा नास्ति तस्मिन् ।

कुतो वाग्विलासेन तस्यास्तु हर्षः,
सुमृद्वी शुभा भावना नास्ति तस्मिन् ।

स्वरे तस्य सङ्गीतकं वा कुतः स्यात्,
समुद्यल्लक्षणा मूर्च्छना नास्ति तस्मिन् ।

विलसितस्य कोऽयं प्रकारोऽस्ति वाचः,
भृशं पिच्छिला वा कला नास्ति तस्मिन् ।

यथा ते विलसितं लसेत् कश्चिदेवम्,
यथा ते सुचलितं चलेत् कश्चिदेवम् ।

अहो भीतभीतस्य भीतिर्ममेयम्,
वदेत् कश्चिदेवं हसेत् कश्चिदेवम् ।

सुमानीव वर्षन्त्युदीते यथेन्दुः,
यथा ते विहसितं हसेत् कश्चिदेवम् ।

मधूनि क्षरन्तीव वहतीव गङ्गा,
यथा ते सुलपितं लपेत् कश्चिदेवम् ।

विहस्येव किञ्चिद् विनाम्येव शीर्षम्,
यथा ते विनमितं नमेत् कश्चिदेवम् ।

सुचित्तं यथा सज्जनानां प्रसन्नम्,
यथा ते सुचरितं चरेत् कश्चिदेवम् ।

हसेर् नैवमुद्यानभूमाविहोच्चैः,
क्षुपो न प्रफुल्लः पतेत् कश्चिदेवम् ।

यथास्त्वन्तिके प्रौढद्राक्षाविदलितम्,
यथा ते सुपठितं पठेत् कश्चिदेवम् ।

लताया यथा मन्दवातेन नृत्यम्,
तथा ते सुवलितं वलेत् कश्चिदेवम् ।

केऽपि मन्ये हसन्तीव माम्,
नैव हेतुर् द्विषन्तीव माम् ।

ये हि गर्तान्मयोत्थापिताः,
ते तु गर्ते क्षिपन्तीव माम् ।

ये तु न स्प्रष्टुमर्हाः पदैः,
ते पदैस्ताडयन्तीव माम् ।

हन्त न श्रोतुमिच्छामि याम्,
तां तु वाचं वदन्तीव माम् ।

सत्सभायां स्तुता ये मया,
ते कथं दूषयन्तीव माम् ।

यैर्मृदु स्निग्धमाभाषितम्,
ते कटु व्याहरन्तीव माम् ।

यैः स्वयं नैव दृष्टा सृतिः,
ते सृतिं दर्शयन्तीव माम् ।

कस्य वक्तव्यमेतत् पुरा,
सेवितास्तर्जयन्तीव माम् ।

त्वदङ्गयष्टिरुदीता लता लसन्तीव,
प्रलम्बदीपशिखा काऽपि सञ्चरन्तीव ।

कुतश्चिदम्बुमयी व्योम्नि भाससे त्वं रे,
तडित्वतां हि घटा काचिदुन्नमन्तीब ।

गतैर्निजैर्ललितैर्लक्ष्यसे प्रभाभरितैः,
सरित्तरङ्गमयी काचिदुच्छलन्तीव ।

स्मिताख्यसत्कलिका या तवाधरे स्फुरति,
उषःप्रभेव प्रभाते परिस्फुरन्तीव ।

त्वदीयकेशततिः श्यामला पयोदघटा,
विलम्बिताऽऽर्द्रतमा काचिदुद्वलन्तीव ।

—७—

न किञ्चिन्मृदु स्यात् सजलजल्पितं मे,
न किञ्चित्कटु स्यात् सजलजल्पितं मे ।

विमृश्यैव पेयं विमृश्यैव हेयम्,
न किञ्चिन्मधु स्यात्सजलजल्पितं मे ।

न किञ्चिन्नवीनं न किञ्चित्पुराणम्,
सहजकल्पनीयं सजलजल्पितं मे ।

न किञ्चिद् गरीयो न किञ्चिल्लघीयः,
समाकर्णनीयं सजलजल्पितं मे ।

बहु व्याहरन्तो वृथा व्याहरन्ति,
मितं किञ्चिदेतत् सजलजल्पितं मे ।

अनेनापि तृप्तो भवेत् कोऽपि लोके,
मरोर्मत् समुत्थं सजलजल्पितं मे ।

कथं कोऽपि न श्रोतुमेव प्रयतते,
न किञ्चित् प्रलपितं सजलजल्पितं मे ।

न किञ्चत्प्रमाणं न किञ्चित् प्रमेयम्,
परं श्रोत्रपेयं सजलजल्पितं मे ।

इदानीं मत्कृते पेयं पिपासा,
सुलभ्या क्वापि रे नेयं पिपासा।

उपायो नैव पानं यत्प्रशान्तेः,
मदीया काऽपि रे सेयं पिपासा।

मयि ज्वालेव काचित् प्रीतिवह्नेः,
कुतश्चिन्मे समिद्धेयं पिपासा।

वरो यल्लाभतो नैवास्ति लाभः,
मदीया साम्प्रतं सेयं पिपासा।

पिपासेयं मदीया मत्कृते नौः,
नदी काऽप्यस्मदीयेयं पिपासा।

ययाऽहं गोपितस्तस्मान्मयापि,
समन्ताद् गोपनीयेयं पिपासा।

मदीयं जीवनं काचित् पिपासा,
न मद्भिन्ना मदीयेयं पिपासा।

तथा मे हानिलाभौ नैव चिन्त्यौ,
यथा जाता सुचिन्त्येयं पिपासा।

इमामुल्लङ्घितुं नाहं समर्थः,
मदीया कापि सीमेयं पिपासा।

इमां जानीहि मां परिचेतुमिच्छुः,
मदीयः परिचयः सेयं पिपासा।

त्वदीयं मुग्धमुग्धं रे विलसितम्,
मदीयं दग्धदग्धं रे विहसितम् ।

त्वदीयं भीतभीतं रे निमिषितम्,
मदीयं शीतशीतं रे प्रशमितम् ।

त्वदीयं रुद्धरुद्धं रे विचलितम्,
मदीयं लुब्धलुब्धं रे विगलितम् ।

त्वदीयं पीतपीतं रे प्रमुदितम्,
मदीयं वीतवीतं रे प्ररुदितम् ।

त्वदीयं सिक्तसिक्तं रे समुदितम्,
मदीयं रिक्तरिक्तं रे समुषितम् ।

त्वदीयं लीनलीनं रे समसितम्,
मदीयं दीनदीनं रे नमसितम् ।

त्वदीयं सिद्धसिद्धं रेऽवगणितम्,
मदीयं विद्धविद्धं रेऽवभणितम् ।

त्वदीयं कूककूकं रे सुलपितम्,
मदीयं मूकमूकं रे विलपितम् ।

त्वदीयं गन्धगन्धं रे सुवलितम्,
मदीयं रन्ध्ररन्ध्रं रे निगडितम् ।

त्वदीयं कान्तकान्तं रे शवलितम्,
मदीयं शान्तशान्तं रे कवलितम् ।

सम्प्रति चित्ते किञ्चिदुदीते तत्र न जाने को हेतुः,
त्वयि जाते मत्तो विपरीते तत्र न जाने को हेतुः।

सुप्तं मां प्रविहाय कुलायात् त्वय्युड्डीने को हेतुः,
इत्थं दैवे सत्यविनीते तत्र न जाने को हेतुः।

सद्भावस्य न कश्चिदभावः, नापि च किञ्चिद् वैमत्यम्,
स्निग्धः कश्चिन्मां न वृणीते तत्र न जाने को हेतुः।

स्मितमुपचारो नतिरुपचारो नटनाटघेन हि को लाभः,
मां प्रति वैमुख्ये निर्णीते तत्र न जाने को हेतुः।

विकसत्युद्यानं हृदि किञ्चिद् यस्यां दृष्टिमुपेतायाम्,
हन्त कथं सा मां न पुनीते तत्र न जाने को हेतुः।

नायात्येव समक्षमदृश्यः कर्तरिकाहस्तो नूनम्,
आयुर्वृक्षं कोऽपि लुनीते तत्र न जाने को हेतुः।

त्वद्वाचं विनिशम्य न किञ्चिद् हसति न रोदिति वा किञ्चिद्,
निजमूर्धानं कोऽपि धुनीते तत्र न जाने को हेतुः।

केनाश्रूणि परेषां हरसि त्वं कुप्यसि तु मया तस्मिन्,
अञ्चल एव तवाद्य गृहीते तत्र न जाने को हेतुः।

हन्त निपीय त्वन्ये याताः कोऽयं ते रोषो ह्यधुना,
किञ्चित् किञ्च मयाऽपि निपीते तत्र न जाने को हेतुः।

न तुभ्यमर्पितमथ किं तदस्तु चरितार्थम्,
मदीयमेत्य त्वदीयत्वमस्तु चरितार्थम् ।

सरिन्न साऽस्ति निजे मार्ग एव शुष्यति या,
सरिज्जलं गतमब्धौ तदस्तु चरितार्थम् ।

प्रदीप ऊर्ध्वमहो धावतीव सूर्यमनु,
ततो विलीय तदस्तित्वमस्तु चरितार्थम् ।

अतीव शोभनमपि तन्नैव नेत्रमिति वाच्यम्,
यदार्द्रमस्ति न चेत् किं तदस्तु चरितार्थम् ।

मरुस्तदस्तु यतो न क्षमा समुद्याति,
क्षमामुपेत्य कथञ्चिद् हृदस्तु चरितार्थम् ।

न यावदत्र पतेत् त्वत्करस्तुषाराभम्,
मदीयजीवनमेतत् किमस्तु चरितार्थम् ।

त्वदिष्टमेव मदस्तित्वकेन संसिध्येत्,
मयोपलब्धमिदं स्वत् त्वयाऽस्तु चरितार्थम्।

मदीयमच्छमिदं स्याद् यथा नवं स्फटिकम्,
शिशोः स्मितोपममस्तित्वमस्तु चरितार्थम् ।

न रूपतश्च तथा नैव वर्णतश्च तथा,
सुगन्धतो हि यथा पुष्पमस्तु चरितार्थम् ।

रुदितं वनेषु मेऽस्ति रे विलपामि किं वृथा,
जीवन् लभे किमेव रे जीवामि किं वृथा।

कर्णं यदा ददासि न मद्वाचि रे तदा,
मूकायितं वरं हि मेऽनुनयामि किं वृथा।

तत् स्वागतं न यत्र न तत् सुप्रभातमाः!
त्वद्द्वारमस्तु तत्र रे तिष्ठामि किं वृथा।

उद्यानके त्वदीय इदं पुष्पमस्ति रे,
निर्गन्धमेव हन्त रे विलसामि किं वृथा।

यस्य क्वचिद् बभूव न योगः स्मितेन रे,
अधरोऽहमस्मि तादृशो विहसामि किं वृथा।

शब्दः स नास्ति येन भवेन्मद्व्यथोदिता,
व्यथयाऽन्तरेव संज्वलन् विमृशामि किं वृथा।

सिद्धिं लभेत केन पथा मन्मनीषितम्,
सीदामि किं वृथा च प्रसीदामि किं वृथा।

नास्ति प्रभाव ईषदपि त्वय्यहो मम,
शंसामि किं वृथा च विनिन्दामि किं वृथा।

यस्मात् पिपासुनैव मया जीवितव्यमाः!
क्लिश्यामि किं वृथा च विहृष्यामि किं वृथा।

जानामि तत्स्वभावमहो नैव मां लिखेत्,
लज्जामि किं वृथा च निमज्जामि किं वृथा।

प्रसूनं कानने दलितं न मन्ये,
सुवर्णं कर्णतो गलितं न मन्ये।

कपोलाभ्यां तवाभ्यां चिक्कणाभ्याम्,
स्वदृष्टेः किञ्चन स्खलितं न मन्ये।

त्वदीयादेकतानध्यानपीठात्,
स्वचित्तस्य क्षणं चलितं न मन्ये।

स्फुरद्दीप्तिप्रतापे भास्करेऽस्मिन्,
प्रदीपस्य क्वचिज्ज्वलितं न मन्ये।

तवास्येनाकलङ्केनेह सौम्ये,
सदङ्केनेन्दुना तुलितं न मन्ये।

कृते स्वस्यैव कस्यापि द्रुमस्य,
समन्तान्निर्भरं फलितं न मन्ये।

विनैव प्रीतिमत्युपचारमात्रम्,
क्वचित् कस्याप्यहो मिलितं न मन्ये।

न यस्मिन् प्रेम्ण ईषत् स्पर्शमात्रम्,
प्रमुग्धं ते तदाकलितं न मन्ये।

दुर्विभाव्यं मम वक्तव्यमदः केषाञ्चित्,
काव्यमित्येव मते किञ्चिददः केषाञ्चित् ।

जायते कोऽपि मदः पानतो वा मद्यस्य,
मामको नैव मदः सोऽथ मदः केषाञ्चित् ।

त्वामगत्वैव परावर्तते वागेषा नः,
येन संस्पृष्ट इव त्वं निनदः केषाञ्चित् ।

नैव सौन्दर्यतो भिन्नो विषयश्चर्चायाः,
यत्र त्वं राजसे तत् किञ्च सदः केषाञ्चित् ।

सम्पदः कस्य न सौभाग्यमिमा गायन्ति,
किन्तु स्पृह्यन्त इतस्ता विपदः केषाञ्चित् ।

नो पिपासोपशमं याति समीपे तेषाम्,
वर्ततां नाम नदी वाऽपि नदः केषाञ्चित् ।

ते मता एव जनाः केऽपि जगत्यस्माकम्,
कोऽपि दृष्टौ न वरो नापसदः केषाञ्चित् ।

त्वत्कृपाभाज इतः केऽपि स्वतो जायन्ते,
धूमसङ्घोऽपि प्रकामं जलदः केषाञ्चित् ।

जायते वस्तुसमूहो जगतो भाग्यवताम्,
निष्फलोऽपीह निकामं फलदः केषाञ्चित् ।

—८—

न कोऽपि हन्त मयि स्निह्यतीति लज्जा मे,
न कोऽपि मां स्वदृशा नह्यतीति लज्जा मे।

अभीप्सितं हि गिरेः शृङ्गगतो मेघ इव,
गतञ्च त्वां मम रे नश्यतीति लज्जा मे।

मया न हन्त कृतं विप्रियं तु कस्यापि,
अकारणं हि जनो द्रुह्यतीति लज्जा मे।

स्वमर्पितं हि मया सर्वमेव तुभ्यं रे,
समीहितं तु न मे सिध्यतीति लज्जा मे।

कमप्यहो नहि दुःखाकरोमि चेत् किञ्चित्,
कथं नु मां स्वजनो विध्यतीति लज्जा मे।

सुतर्पणाय मया किन्न किन्न हन्त कृतम्,
तथापि नैव मनस्तृप्यतीति लज्जा मे।

मदीयदोषमहो मद्रिपुं समाहूय,
मदीय एव जनः पुष्यतीति लज्जा मे।

न कोऽपि निर्दिशति प्रीतये कियद् देयम्,
स नैव किञ्चिदहो तुष्यतीति लज्जा मे।

न केचित् त्वामरे॰ हातुं क्षमन्ते,
स्वलाभं के हि रे दातुं क्षमन्ते ।

मिलेन्न त्वत्कराच्चेन्मादृशास्ताम्,
सुधां किञ्चिन्न रे पातुं क्षमन्ते ।

दुरन्तेयं तृषा मन्ये ह्यतृप्ताः,
समुद्रं स्वोदरे मातुं क्षमन्ते ।

न हृत्तन्त्रीं यदा सङ्घट्टयेस्त्वम्,
तदा के चत्वरे गातुं क्षमन्ते ।

निबद्धास्त्वत्सुवीक्षितरश्मिनैते,
क्व किञ्चिद् गत्वरे यातुं क्षमन्ते ।

स्वदृग्भ्यां चेत् स्वकांस्त्वं स्नापयेस्ते,
दवाग्नावप्यरे स्नातुं क्षमन्ते ।

अनाघ्रातं निबद्धं मूर्ध्नि पुष्पम्,
त्वदीयाः सत्वरे घ्रातुं क्षमन्ते ।

त्वदीयप्रीतिलाभेनैव शक्ताः,
परत्रस्तानरे त्रातुं क्षमन्ते ।

पश्येयमेष त्वां नु दृशं देहि मदर्थम्,
दृष्टिं कृपामयीं नु भृशं देहि मदर्थम् ।

अधिपानगोष्ठि पात्रमहं स्थातुमेष चेत्,
अधिकाधिकां कदापि तृषं देहि मदर्थम् ।

पीत्वा पुनः पिबानि न तृप्तिर्भवेन्मम,
एतादृशीं कदापि तृषं देहि मदर्थम् ।

अन्ये लभन्त एव मधु त्वत्करादहो,
अभ्यर्थयामि हन्त तृषं देहि मदर्थम् ।

जाने न किञ्चिदेव, कृपा किं क्व ते फलेत्,
मध्वन्यतः प्रवर्ष, तृषं देहि मदर्थम् ।

नैव त्वदस्ति किञ्चिदितोऽन्यन्मदीप्सितम्,
मरुरेष कामये नु तृषं देहि मदर्थम् ।

अन्ये लभन्त एव मधु त्वत्पिपासवः,
एकां पिबेयमेष तृषं देहि मदर्थम् ।

उद्यत्प्रकाशमेव दिनं देहि परस्मै,
घोरां तमस्विनीञ्च निशं देहि मदर्थम् ।

भ्रान्तोऽहमेष हन्त कियद् वा भ्रमाम्यहम्,
तां, त्वां यया लभे नु दिशं देहि मदर्थम् ।

विलोक्य मां नु जनः सुन्दरोऽपि सन्दिग्धे,
कमाश्रयामि गिरिं कन्दरोऽपि सन्दिग्धे।

कथं वनाय मदीया स्थितिर्हि रोचेत,
द्रुमस्य कैव कथा ह्यङ्कुरोऽपि सन्दिग्धे।

सरोवरस्य तटे कस्यचित् प्रयामि यदा,
झषस्य कैव कथा दर्दुरोऽपि सन्दिग्धे।

तवानया सततं रथ्यया स सम्पृक्तः,
जनस्य कैव कथा कुक्कुरोऽपि सन्दिग्धे।

पराजितस्य ततो मादृशस्य किं वाच्यम्,
विधौ विरुद्ध इतो जित्वरोऽपि सन्दिग्धे।

बहूनि हन्त प्रसूनानि मद्विरुद्धानि,
महाकठोरतमः प्रस्तरोऽपि सन्दिग्धे।

सुदुर्निवारमहो किञ्चिदेक्ष्य मत्पापम्,
भृशं पवित्रतमो गोः खुरोऽपि सन्दिग्धे।

मरुं विलोक्य तपन्तं निरन्तरं बत माम्,
तडित्वतां हि गणो मेदुरोऽपि सन्दिग्धे।

स एकमात्रमहो मादृशां सदा शरणम्,
त्वदक्षिकोण इतः कर्बुरोऽपि सन्दिग्धे।

समुद्र एव सरिद् वाऽपि वापिकाऽपि तथा,
पिपासुमेक्ष्य तटे मां सरोऽपि सन्दिग्धे।

अद्ययावन्न तं जनं जाने,
यो हि भिन्नोऽस्ति तं कथं जाने ।

कीदृशोऽसौ तथा जनः कोऽसौ,
तं न जाने न तन्मतं जाने ।

स्वस्मितस्यास्ति यो हि विक्रेता,
तस्य किञ्चिन्न तत् स्मितं जाने ।

यो न हृदयेन भाषते किञ्चित्,
तस्य कस्मात् सुभाषितं जाने ।

यत्र किञ्चिन्न लक्ष्यते स्नेहः,
नैव जानन्नपीह तं जाने ।

यस्य जातः स्वभाव उपचारः,
तस्य विषये क्वचित् कथं जाने ।

यो न हृदयस्य भाषितं वेद,
तस्य किञ्चिन्न भाषितं जाने ।

यो न फलतीह किञ्च सद्भावम्,
जीवितं तस्य निष्फलं जाने ।

नैव यः स्निग्ध एव हृदयेन,
सुन्दरं तं न सुन्दरं जाने ।

यस्य विनयो न भूषणं चित्ते,
भूषितं तं न भूषितं जाने ।

वक्तुमर्हामि न वचनीयमहं त्वद्भङ्ग्या,
दुःखमिच्छामि न शमनीयमहं त्वद्भङ्ग्या ।

अन्यथा यद्यपि कलयेयुरिमे मां लोकाः,
द्रष्टुमर्हामि न कलनीयमहं त्वद्भङ्ग्या ।

जीवनं भार इतः स्यादपि शक्यं वोढुम्,
वोढुमर्हामि न वहनीयमहं त्वद्भङ्ग्या ।

त्वं हि लक्ष्यं मम रे यद्यपि शक्यं गन्तुम्,
गन्तुमर्हामि न गमनीयमहं त्वद्भङ्ग्या ।

नास्ति तत्ते मम रे यन्नहि शक्यं सोढुम्,
सोढुमर्हामि न सहनीयमहं त्वद्भङ्ग्या ।

मत्कृते हन्त न रे किं न त्वदीयं रम्यम्,
रन्तुमर्हामि न रमणीयमहं त्वद्भङ्ग्या ।

त्वद्रहोभाषितमस्त्येव मया मन्तव्यम्,
मन्तुमर्हामि न मननीयमहं त्वद्भङ्ग्या ।

केशपाशात् तव रे तच्च निपतितं कुसुमम्,
चेतुमर्हामि न चयनीयमहं त्वद्भङ्ग्या ।

यत्त्वदीयं वलितं तच्च मया स्तोतव्यम्,
स्तोतुमर्हामि न स्तवनीयमहं त्वद्भङ्ग्या ।

एष उपहार उपान्ते तव रे नेतव्यः,
नेतुमर्हामि न नयनीयमहं त्वद्भङ्ग्या ।

हन्त नायाति तस्य सन्देशः
नन्वसन्देश एव सन्देशः।

यो वसन्ते हि कोकिलालापः,
तस्य किं वा स एव सन्देशः।

मन्मुखरतैव मे हि सन्देशः,
मौनमित्येव तस्य सन्देशः।

मत्कृते हन्त सोऽपि जानाति,
प्राणभूतोऽस्ति तस्य सन्देशः।

येन किञ्चित् श्रुतः स नायाति,
तन्मुखेनैव तस्य सन्देशः।

तेन रुदितं तदाऽथवा हसितम्,
दीयतां तेन तस्य सन्देशः।

मेघदूतेन नीयतां केन,
रामगिर्याश्रमस्य सन्देशः।

तस्य वचसः कियन्नु प्रामाण्यम्,
प्रेषितोऽद्यापि नैव सन्देशः।

तस्य विषये किमेव वक्तव्यम्,
यस्य लब्धो न कोऽपि सन्देशः।

मया ते सर्वमाकलितं त्वदुल्लासेन को लाभः,
कुतो रुदितेन ते लाभः कुतो हासेन ते लाभः ।

कवित्वं स्वस्य नापेक्षेत किञ्चिद् वर्णनीयत्वम्,
ततः श्लेषेण को लाभो ह्यनुप्रासेन को लाभः ।

मया स्वे पञ्जरे ह्यस्मिन् निबद्धेनैव चेद् याप्यम्,
कियद् वा विस्तृतं स्यादेतदाकाशेन को लाभः ।

न कालस्यास्ति भानं मे निगडितस्येह सीमायाम्,
यथा दिवसेन को लाभस्तथा मासेन को लाभः ।

सुखस्येमानि मन्ये साधनानि त्वां विना दुःखम्,
सुखं शयनेन को लाभः सुखावासेन को लाभः ।

मदीये जीवने ते चन्द्रतुल्याया न चेज्ज्योत्स्ना,
तदा विद्युत्प्रभावेण त्वदाभासेन को लाभः ।

न यावत् संस्कृता वाणी जनं सामान्यमुद्गच्छेत्,
क्व तावत् कालिदासेनाथवा भासेन को लाभः ।

इदानीमप्यविज्ञातं रहस्यं हृद्गतं ते चेत्,
तवास्या हन्त वार्ताया उपन्यासेन को लाभः ।

विनायासं बहूनां हन्त सिध्यन्त्येव कार्याणि,
दृशा संकेतरूपेण त्वदायासेन को लाभः ।

मदीये भाग्य एवास्ते विलम्बो नैष ते दोषः,
इदानीमुष्णमुष्णं हन्त निःश्वासेन को लाभः ।

—६—

बाधन्त एत एत्य समृद्धाः पदे पदे,
उड्डीय यामि कुत्र निबद्धाः पदे पदे।

अङ्गीकरोमि हन्त न वाऽङ्गीकरोम्यहम्,
गोमायवः कुतोऽपि च गृध्राः पदे पदे।

लक्ष्यं प्रतीह केन पथा गम्यतां जनैः,
सन्त्येव वह्नयो हि समिद्धाः पदे पदे।

मुग्धस्य मे कुतोऽपि जगत्यां स्थितिर्भवेत्,
सर्वत्र जाग्रतीह विदग्धाः पदे पदे।

कः स्याद् य उपचरेदिह दग्धाय मादृशे,
बह्वो मिलन्ति चेदिह दग्धाः पदे पदे।

मन्दायते न तेज इतः सर्वथा क्षणम्,
येषां मिलन्ति ते नहि सिद्धाः पदे पदे।

यत्रैव यामि हन्त मिलन्त्येन केचन,
त्वद्वीक्षितैः शरैरिह विद्धाः पदे पदे।

उपचार एष वर्जितस्त्वद्द्वारि सर्वथा,
प्रणमन्ति व्यर्थमेव निबद्धाः पदे पदे।

स्नेहो हि कोऽपि पाश इतो निर्मितस्त्वया,
प्रभवन्ति नैव येन पिनद्धाः पदे पदे।

रूपस्य वा तवैव चमत्कार एष रे,
पश्यन्ति वञ्चिता इव रुद्धाः पदे पदे।

न तद् गीतं मया रे यन्न गेयम्,
न तत् पीतं त्वया रे यन्न पेयम् ।

कुतोऽस्वीकार्यमासीन्मे त्वदाप्तम्,
न दत्तं रे त्वया मे यन्न देयम् ।

त्वदमृते वा न ते गरले च भेदः,
न नीतं तत् त्वया रे यन्न नेयम् ।

समं त्वत्कण्टको वा त्वत्प्रसूनम्,
मया प्रचितं न तद् रे यन्न चेयम् ।

भवेद्दूरेऽथवा निकटे क्व भेदः,
मितं तन्नैव किञ्चिद् यन्न मेयम् ।

मदीयं तच्च रुदितं तच्च हसितम्,
त्वया ध्यातं न तद् रे यन्न ध्येयम् ।

गुणा मय्येव रे मय्येव दोषाः,
त्वया ज्ञातं न तद् रे यन्न ज्ञेयम् ।

सुगन्धो मे च दुर्गन्धस्तथा मे,
त्वया घ्रातं न तद् रे यन्न घ्रेयम् ।

सवैलक्षण्यमास्वाद्यं सलावण्यं समाधुर्यम्,
न लोकोत्तरमतो भिन्नं सलावण्यं समाधुर्यम् ।

पृथिव्यां भाग्यहीनास्ते मनुष्या मद्विचारेण,
निपीतं यैर्न तद् वक्त्रं सलावण्यं समाधुर्यम् ।

अभिव्यङ्ग्य' विविक्तैरवयवैर्यद् वा सुसंश्लिष्टैः,
मतं सौन्दर्यपर्यायं सलावण्यं समाधुर्यम् ।

न किं रुदितं सलावण्यं न किं हसितं समाधुर्यम्,
तदेकीकृत्य चास्वाद्यं सलावण्यं समाधुर्यम् ।

तदीक्षितकं समास्वाद्यं कदाचित् तद्विवक्षितकम्,
समास्वाद्यञ्च तन्मिश्रं सलावण्यं समाधुर्यम् ।

सुसाहित्यं सलावण्यं सुसङ्गीतं समाधुर्यम्,
द्वयोर्मिश्रं तदास्वाद्यं सलावण्यं समाधुर्यम् ।

तदीयं विस्मितं लवणं तदीयं सुस्मितं मधुरम्,
तदुभयं जायतेऽभिन्नं सलावण्यं समाधुर्यम् ।

यस्य कस्यापि न भवतीह विलसितं सरलम्,
किञ्चिदधिकं हि प्रभवतीह विलसितं सरलम्।

एकतो दीप्तिरहो काचिदलङ्कारणाम्,
अन्यतः कस्यचिदस्तीह विलसितं सरलम्।

दृष्टयस्तत्र हठादेव पतन्त्यस्माकम्,
कस्यचिद् यत्र विलसतीह विलसितं सरलम्।

पीडयत्यर्धनिविष्टो हृदि यद्वद् बाणः,
पीडयेत् कस्यचनातीव विलसितं सरलम्।

यच्च ललितादपि मधुरादपि ललितं मधुरम्,
तद् हि कस्यापि विभातीह विलसितं सरलम्।

शोभनं शोभनमित्युद्व्रजतीवोल्लपितम्,
पश्यतां कस्यचनापीह विलसितं सरलम्।

किञ्चिदतिशय्य सुकथितं न कवित्वं मन्ये,
तत्सुकाव्यं ननु यदतीव विलसितं सरलम्।

मुखं तस्याः सताम्बूलद्वयं किम्,
जगत् सर्वं सताम्बूलद्वयं किम् ।

सरागं रे जगद् भात्येव सर्वम्,
मुखे कस्यापि ताम्बूलद्वयं किम् ।

मदीयं चित्तमद्यावधि सरागम्,
मुखस्थं तस्य ताम्बूलद्वयं किम् ।

तदास्वादे चमत्कारोऽस्ति कश्चित्,
यदाऽऽस्ये तस्य ताम्बूलद्वयं किम् ।

तदीयं भाषितं सुस्निग्धमद्य,
मुखस्थं तस्य ताम्बूलद्वयं किम् ।

समुद्गीर्णं जगत् कुरुते सरागम्,
मुखात् कस्यापि ताम्बूलद्वयं किम् ।

मदर्थं केवलं ताम्बूलमेकम्,
परेभ्यो हन्त ताम्बूलद्वयं किम् ।

सखदिरं वा सपूगं वा सचूर्णम्,
प्रसादस्तस्य ताम्बूलद्वयं किम् ।

न किञ्चिन्नाटकं शाकुन्तलं ते,
तपस्यायाः फलं शाकुन्तलं ते ।

सरस्वत्याः शिरः सत्कुन्तलं तत्,
समग्रं नैव किं शाकुन्तलं ते ।

गिरां देव्या मुखात् ताम्बूलसारः,
य आप्तः सोऽस्ति किं शाकुन्तलं ते ।

सरस्वत्यास्तदुद्यानस्य मन्ये,
अनाघ्रातं सुमं शाकुन्तलं ते ।

विदग्धैः किन्नु पेयं भाग्यवद्भिः,
सुमुग्धायाः स्मितं शाकुन्तलं ते ।

विकसितः सीधुगण्डूषस्य सेकात्,
तरुर्बकुलोऽस्ति किं शाकुन्तलं ते ।

गिरां देव्याश्चरन्त्या नूपुराणाम्,
सुपदयोः शिञ्जितं शाकुन्तलं ते ।

वियुक्तस्यैव तन्मन्येऽश्रुपूतम्,
त्वदीयं किञ्च रे तन्मेघदूतम्।

स शापो वर्षभोग्यः कस्य भाग्ये,
यदीयं रे फलं तन्मेघदूतम्।

पवित्रं स्नानतो जनकात्मजायाः,
तव स्वान्तं यदब्जं मेघदूतम्।

हरत्येतज्जनानां चित्तहरिणम्,
त्वदीयं कामरूपं मेघदूतम्।

समुल्लसितं गिरां देव्या विलसितम्,
त्वदाकूतं प्रभूतं मेघदूतम्।

बहूनां जन्मनां पुण्यैः समृद्धः,
त्वादाशाबन्ध एतन्मेघदूतम्।

अहो तान् वञ्चितान् मन्ये विदग्धान्,
न कलितं यैस्त्वदीयं मेघदूतम्।

यथा स्तनितं घनानां श्रोत्रपेयम्,
तथा ग्राह्यं त्वदीयं मेघदूतम्।

पुराणं भारतं यस्मिन्नवीनम्,
चिरं रम्यं तदेतन्मेघदूतम्।

समग्रं संस्कृतं शर्वाट्टहासः,
उमायाः सुस्मितं तन्मेघदूतम्।

उपन्यासोऽद्भुतः कादम्बरी ते,
सुवर्णालङ्कृतिः कादम्बरी ते।

विहाय त्वां सुवाणी कं वृणीते,
प्रसादोऽस्याः कथा कादम्बरी ते।

परिस्फुरता कलालापेन रम्या,
वधूः शय्यां गता कादम्बरी ते।

गिरां देव्याः क्वचिद् धमिल्लतः किम्,
प्रसूनं भूगतं कादम्बरी ते।

नवो व्यासावतारो बाणभट्टः,
नवीनं भारतं कादम्बरी ते।

मदीयः किमपि वाग्देव्या विलसितम्,
सतां चेतोहरं कादम्बरी ते।

अवन्तीयं क्वचिद् रे श्रीविशाला,
क्वचिद् विन्ध्याटवी कादम्बरी ते।

न यां पीत्वैव चेतयते जनोऽयम्,
प्रसन्ना काऽप्यसौ कादम्बरी ते।

—१०—

न तस्य मह्यमुपैतीह कोऽपि सन्देशः,
भवेन्नु विस्मृतिशीलस्य कोऽपि सन्देशः ।

लिखेन्न वापि लिखेद् विस्मरेच्च सङ्केतम्,
य एव तस्य नु भवतीह कोऽपि सन्देशः ।

तदीयकेशवत् तत्रापि कुञ्चितत्वं स्यात्,
स एतु तस्य द्रुतं कुञ्चितोऽपि सन्देशः ।

प्रतीक्ष्यतामथवा न प्रतीक्ष्यतां स मया,
न भाग्य एव ममास्ते कुतोऽपि सन्देशः ।

हठं स्वभावगतं तस्य सर्वथा जाने,
न दास्यते ननु तेनेह कोऽपि सन्देशः ।

उपैति सम्प्रति तत एव पावनः पवनः,
किमेव तस्य समायाति कोऽपि सन्देशः ।

मन्यते सोऽपि वर्तते कश्चित्,
सर्वथाऽन्योऽपि वर्तते कश्चित् ।

त्वद्‌बले मेऽस्ति नैव सन्देहः,
सन्दिहानोऽपि वर्तते कश्चित ।

त्वद्‌भयान्नैव चेष्टते कोऽपि,
व्यक्तहासोऽपि वर्तते कश्चित् ।

किं त्वया चिन्तितं तु, त्वत्पुर्याम्,
सपिपासोऽपि वर्तते कश्चित् ।

त्वां गतास्त्वद्‌गतानुगतिकास्ते,
त्वद्‌विमुक्तोऽपि वर्तते कश्चित् ।

सन्ति विहितास्त्वया नु मार्गस्थाः,
मुक्तमार्गोऽपि वर्तते कश्चित् ।

सन्त्यनेके जगत्यहो पाशाः,
स्नेहपाशोऽपि वर्तते कश्चित् ।

नीडसम्भासिते त्वदुद्याने,
नष्टनीडोऽपि वर्तते कश्चित् ।

त्वत्सभायां विदग्धभरितायाम्,
मुग्धमुग्धोऽपि वर्तते कश्चित् ।

सर्व एव स्तुवन्ति त्वामुच्चैः,
मूकमूकोऽपि वर्तते कश्चित् ।

सिध्येदभीप्सितं न च सिध्येदभीप्सितम्,
अस्माकमेकमेव त्वमेकाऽस्यभीप्सितम् ।

क्वाभीप्सितानि सन्ति बहूनीह मादृशाम्,
मन्ये बहु त्वमेकमिदानीमभीप्सितम् ।

कुर्यामितः कथन्नु सुधाया अभीप्सितम्,
सर्वात्मना त्वमेव यदेकाऽस्यभीप्सितम् ।

अस्तित्वमेतदस्ति मदीयं हि मृन्मयम्,
भविता हिरण्मयं यदि ते स्यादभीप्सितम् ।

श्रोतुं न कोऽपि चेष्टते मूकस्य मे व्यथाम्,
अत एव किञ्चिदुक्तमिदानीमभीप्सितम् ।

मूकायितं तु तावदिदं मन्यते वरम्,
उत्कण्ठितः क एव हि शृणुयादभीप्सितम् ।

शुचये तव स्मिताय शपे, सर्वथाऽऽत्मनः,
त्वच्चेष्टितं विना न प्रकटयाम्यभीप्सितम् ।

भिन्नं त्वदीप्सितेन हि नाभीप्सितं मम,
स्वाभीप्सितं प्रकाशय शृणु मेऽप्यभीप्सितम्।

स्वाभीष्टसाधनाय यतन्ते कियत् कियत्,
लोके नरा धनाय यतन्ते कियत् कियत् ।

भावान् निजान् विकीर्णतमान् केऽपि भावकाः,
छन्दःसु बन्धनाय यतन्ते कियत् कियत् ।

त्वत्प्रेम्णि ते निबद्धहृदः केचिदुन्मदाः,
त्वच्चित्तरञ्जनाय यतन्ते कियत् कियत् ।

सङ्केतमेव ते दृश आलम्ब्य साम्प्रतम्,
बहवो हि वन्दनाय यतन्ते कियत् कियत् ।

नैव प्रसीदसीह कथं त्वत्परा इमे,
तव रे प्रसादनाय यतन्ते कियत् कियत् ।

तुभ्यं समर्प्य सर्वमपि स्वं प्रसाधकाः,
तव रे प्रसाधनाय यतन्ते कियत् कियत् ।

स्यात् त्वत्कृपाख्यवारिदच्छन्नं नभो मनः,
इति केऽपि दुर्दिनाय यतन्ते कियत् कियत् ।

केऽपि स्मिते तवापि च केऽपीङ्गिते शुभे,
चित्तस्य बन्धनाय यतन्ते कियत् कियत् ।

केचिद् विलक्षणाय निजे जीवने क्षणम्,
मुग्धे त्वदीक्षणाय यतन्ते कियत् कियत् ।

विरहव्यथाभरेण कथं नीयतां निशा,
केनापि पीडितेन कथं नीयतां निशा।

मित्रैः समश्च किञ्चिदुदारैः समव्यथैः,
सम्प्राप्तयापनेन कथं नीयतां निशा।

स्मृतयः परापतन्ति विनैव क्रमं हृदि,
तद्व्याकुलीकृतेन कथं नीयतां निशा।

मन्येत नापि सत्यमिदं किञ्चिदीरितम्,
विश्वासविरहितेन कथं नीयतां निशा।

भ्रान्ताय त्वादृशेन कथं दीयतां दिशा,
अभिधेहि मादृशेन कथं नीयतां निशा।

त्वद्भाषितानि कानिचिदायान्ति मत्स्मृतिम्,
स्मृत्युत्सुकीकृतेन कथं नीयतां निशा।

दीपावली तवैव कृते जायतां शुभा,
तामस्यतिव्यथेन कथं नीयतां निशा।

यस्यां तव स्मितेन्दुरुदीते नहि क्षणम्,
सेयं मया निजेन कथं नीयतां निशा।

समुदेति सुप्रभाते किमु तस्य मन्दहासः,
स्फुरतीव चन्द्रहासः किमु तस्य मन्दहासः ।

मम चेतसो नवीनो बत कोऽपि बन्धहेतुः,
मृगयोरिवैष पाशः किमु तस्य मन्दहासः ।

मुरलीरवोपमेन स्वरसम्भरेण कलितः,
वृन्दावनस्य रासः किमु तस्य मन्दहासः ।

मृदुसौरभेण भरितः सुमनोविकासहेतुः,
सरसो वसन्तमासः किमु तस्य मन्दहासः ।

सुरभिः शकुन्तलाया मृदुकल्पनाभिरधिकः,
स्वगुणेन कालिदासः किमू तस्य मन्दहासः ।

परिमार्जितं नवीनं शरदिन्दुचन्द्रिकाभिः,
कमनीयशुक्लवासः किमु तस्य मन्दहासः ।

किरणेन सम्पिनद्धो मृदुना हिरण्मयेन,
प्रसृतोऽथवा विलासः किमु तस्य मन्दहासः ।

रमणीयताप्रगुणितो रदनच्छदावभासः,
मृदुप्रच्छदाख्यवासः किमु तस्य मन्दहासः ।

व्यथेति या हृदि मे तां पिपासुतेत्याहुः,
किमाहुरेतदमी तां पिपासुतेत्याहुः ।

यदीक्षितं मम यां प्रत्यनेकशः केचित्,
सुहृद्वराः स्थितिमेतां पिपासुतेत्याहुः ।

नदीति येयमहो सेविता मया प्रीतिः,
सुबुद्धिमन्त इमे तां पिपासुतेत्याहुः ।

गुणो मदीय इति प्रीतिशालिनः केचित्,
त्रुटिर्ममेति जनास्तां पिपासुतेत्याहुः ।

शुभस्य शीघ्रमितीव प्रकाशिता स्वमतिः,
जनाः समग्रविदस्तां पिपासुतेत्याहुः ।

सरित्प्रधावति यद्वा समुद्रमनु केचित्,
रवेण तद्गतिमेतां पिपासुतेत्याहुः ।

उदेति काचिदहो मे जिजीविषा हृदि या,
ममानुभूतिभरास्तां पिपासुतेत्याहुः ।

मही तपत्यथ सूर्यस्तपत्यथापि नभः,
स्थितिं तु केऽपि जनास्तां पिपासुतेत्याहुः ।

उपचार इतः कश्चन मान्यो नहि पन्थाः,
आरोप इतः कश्चन मान्यो नहि पन्थाः।

निर्णीत इतः कश्चन प्रणये नहि पक्षः,
सिद्धान्त इतः कश्चन मान्यो नहि पन्थाः।

नाश्रीयते प्रीतौ हि जनैः काचिदनीतिः,
नीतिः परमस्यां बत मान्यो नहि पन्थाः।

प्रणयस्य हि निर्धारित एवास्ति न पन्थाः,
पन्था इति कश्चिद् बत मान्यो नहि पन्थाः।

अश्रूण्यपि वर्षन्ति परं तानि न वर्षाः,
वर्षा इति प्रणये बत मान्यो नहि पन्थाः।

हसितं नहि पन्था इह रुदितं नहि पन्थाः,
उभयोरपि मध्ये बत मान्यो नहि पन्थाः।

वाणिज्यमिति प्रीतिपथे काऽपि न रीतिः,
व्यापार इतः कश्चन मान्यो नहि पन्थाः।

सङ्गीतमिदं किञ्चन रमयत्यपि चेतः,
रागः प्रणयेऽस्मिन् बत मान्यो नहि पन्थाः।

प्रविशन्ति त एवेह भयं येषु न मृत्योः,
मृत्युः क्वचिदस्मिन् बत मान्यो नहि पन्थाः।

सार्थकत्वं नीयतामस्तित्वमेतन्मृन्मयम्,
स्वं परस्मै दीयतामस्तित्वमेतन्मृन्मयम् ।

सर्वथा केनेह लब्धः स्वानुकूलो ह्यवसरः,
यादृशं तच्चीयतामस्तित्वमेतन्मृन्मयम् ।

स्नेहबन्धो नैव बन्धस्तादृशो यस्त्रुटयति,
चेन्मुहूर्ते क्षीयतामस्तित्वमेतन्मृन्मयम् ।

एक एव प्रशस्य एतस्मिन् हि यस्त्वां निर्ममौ,
न त्वया स्वं गीयतामस्तित्वमेतन्मृन्मयम् ।

यत्र यत्रैवास्ति विच्छेदो द्वयोर्वा चित्तयोः,
तत्र रे सन्धीयतामस्तित्वमेतन्मृन्मयम् ।

स्वापराधान् पश्य तस्यापि क्षमाः परिशीलय,
जागृहीह न हीयतामस्तित्वमेतन्मृन्मयम् ।

कस्यचिद् वचसा त्वदीयेनेह न त्रुटयेन्मनः,
मौनमेवाश्रीयतामस्तित्वमेतन्मृन्मयम् ।

तद् हिरण्मयतां व्रजेद् रे स्पर्शतस्तत्पादयोः,
नीयतां रे नीयतामस्तित्वमेतन्मृन्मयम् ।

यस्य हि स्थायित्वमस्मिन् बुद्बुदोपममस्ति रे,
हन्त नैवास्थीयतामस्तित्वमेतन्मृन्मयम् ।

येन नैकटयं तवासौ दूरतो यातः क्वचित्,
स क्व चेतो धीयतामस्तित्वमेतन्मृन्मयम् ।

चेतो निमीलयेदिह तस्या निमीलितम्,
प्रीतिं समीरयेदिह तस्या निमीलितम् ।

अन्तर्निगूढमप्यतियत्नेन रक्षितम्,
उन्मीलयेन्न किं किमु तस्या निमीलितम् ।

भ्रमता मयोत्सुकेन च सर्वत्र शीलितम्,
नैवामिलत् कुतोऽप्यथ तस्या निमीलितम् ।

उन्मीलितं गतं ननु तन्मेऽनुकूलताम्,
विदधीत किन्नु मे बत तस्या निमीलितम् ।

अस्तित्वमात्मनस्त्वमितो रक्ष सर्वथा,
किं किं न मीलयेदिह तस्या निमीलितम् ।

निकटे स्थितं भवेदथ दूरे स्थितं भवेत्,
लक्ष्यीकरोति मामिह तस्या निमीलितम् ।

तस्या यदस्तु सर्वमितः स्वीकरिष्यते,
उन्मीलितं तदस्त्वथ तस्या निमीलितम् ।

भेदो न कोऽपि हन्त तयोर्लक्षितो मया,
उन्मीलितं तदेव हि तस्या निमीलितम् ।

उन्मीलितं तथा नहि सन्धाय पीडयेत्,
व्यथयेद् यथा प्रविश्य हि तस्या निमीलितम् ।

इतः प्रतिष्ठ ततो यत्र तत्करान्मिलति,
कियन्न किन्न ततो यत्र तत्करान्मिलति ।

अलभ्यमन्यजनैरेव तत्करान्मिलति,
प्रशस्तमेव प्रशस्तं हि तत्करान्मिलति ।

स एव मत्कृते स्वर्गस्ततो मया स्थेयम्,
मधूत्तमं सततं यत्र तत्करान्मिलति ।

तदस्तु काऽपि सुधा तन्न शक्यते वक्तुम्,
अपूर्वमेवमहो वस्तु तत्करान्मिलति ।

निजो न कश्चिदिहारोप्यते मया पक्षः,
तदीप्सितं मम रे वस्तु तत्करान्मिलति ।

तदस्ति याचितकं तेन नास्ति तल्लघु रे,
महत् तदेव मतं यद्धि तत्करान्मिलति ।

किमेव वाच्यमहो मादृशामहोभाग्यम्,
कदाचिदेव हृतं वस्तु तत्करान्मिलति ।

यदर्पयेन्ननु सा तच्च शोभनं भवति,
किमेव सम्प्रति पश्येह तत्करान्मिलति ।

विदग्धतैव तवेयं सखे महाबाधा,
किमन्यथा न मतं वस्तु तत्करान्मिलति ।

सुहृद्भावस्य सन्धाने निषेधो वा विधिर्वा कः,
स्वकीयस्यानुसन्धाने निषेधो वा विधिर्वा कः ।

न जागर्तीह तावत् स्नेहसंवलितः सुहृद्भावः,
प्रवृत्ते हन्त सद्भावे निषेधो वा विधिर्वा कः ।

स कश्चिद् युष्मदस्मद्भेदसद्भावो रसेऽन्यस्मिन्,
प्रवृत्ते हन्त शृङ्गारे निषेधो वा विधिर्वा कः ।

सति द्वैते प्रतिष्ठाभाजि भावानां स्थितिर्द्वैधा,
सदद्वैतप्रतिष्ठायां निषेधो वा विधिर्वा कः ।

तवोद्याने विधानानीह तावत् सन्त्यनेकानि,
प्रवृत्ते सद्वसन्ततौ निषेधो वा विधिर्वा कः ।

निषेध्यं वा विधेयं वा ध्वनिष्वन्येषु जाग्रत्सु,
क्वचिद् वंशीध्वनौ जाते निषेधो वा विधिर्वा कः ।

निषेधानां विधीनां वा प्रवृत्तिर्धार्मिकैर्मान्या,
परं पानप्रसङ्गेऽस्मिन् निषेधो वा विधिर्वा कः ।

विधीनां वा निषेधानां विलासास्तावदेते स्युः,
प्रवृत्ते त्वद्विलासेऽस्मिन् निषेधो वा विधिर्वा कः ।

अयं विप्रोऽस्त्ययं शूद्रोऽस्ति जागर्त्यन्यतीर्थेषु,
जगन्नाथस्य सत्तीर्थे निषेधो वा विधिर्वा कः ।

न किञ्चित् त्वन्ममेदमपेक्षणीयम्,
तवाप्यस्त्येव किं मदपेक्षणीयम् ।

स एवं स्नेहबन्धो नाटकीयः,
मम स्यात् त्वन्न ते मदपेक्षणीयम् ।

अपूर्णस्त्वं तदा पूर्णत्वमीयाः,
यदा तस्मात् फलेत् त्वदपेक्षणीयम् ।

इहास्ते त्वां प्रति स्निग्धोऽपि कश्चित्,
क्षणं प्रकटीकुरु त्वमपेक्षणीयम् ।

न संसारश्चलेद् यद्येव न स्यात्,
इतः कस्यापि किञ्चिदपेक्षणीयम् ।

कुतः स्याद् गौरवाय लघुत्वमेतत्,
यदि स्यान्न त्वदीयमपेक्षणीयम् ।

कियन्मां मन्यसे त्वमपेक्षणीयम्,
मदीयं सर्वथा त्वमपेक्षणीयम् ।

य एते वाचि संसिद्धास्त्वया मन्ये परीक्ष्यास्ते,
न ये हृदि सर्वथा विद्धास्त्वया मन्ये परीक्ष्यास्ते।

त्वदीयायां सभायां गन्धवद्बहुलोकभरितायाम्,
य एते केऽपि सद्गन्धास्त्वया मन्ये परीक्ष्यास्ते।

इदानीं के वयं येषां समीपे नास्ति ते देयम्,
इमे दानप्रगल्भा ये त्वया मन्ये परीक्ष्यास्ते।

बहूनामेव लोकानां जगत्यभ्यर्थितं सिध्येत्,
य एतेऽभ्यर्थनानिपुणास्त्वया मन्ये परीक्ष्यास्ते।

सुखेष्वेवास्ति येषां जन्मसिद्धः कश्चिदधिकारः,
य एते सौख्यसम्भरितास्त्वया मन्ये परीक्ष्यास्ते।

द्रुमाणामर्पणीयैः सत्फलैरेवास्ति फलवत्त्वम्,
य एते सत्फलैराढ्यास्त्वया मन्ये परीक्ष्यास्ते।

विपन्नाः सर्वथा लोके त्वया सम्पादिताः केचित्,
इदानीं ये हि सम्पन्नास्त्वया मन्ये परीक्ष्यास्ते।

सभायां त्वय्युपेते जायते कोलाहलोऽभ्यधिकः,
इमे कोलाहलेऽभ्यस्तास्त्वया मन्ये परीक्ष्यास्ते।

न यैरपराध एतस्यां जगत्यां सर्वथा विहितः,
निरपराधा इदानीं ये त्वया मन्ये परीक्ष्यास्ते।

अनुत्तीर्णाः परीक्षायां वयं के ? किन्तु ये केचित्,
समुत्तीर्णाः परीक्षायां त्वया मन्ये परीक्ष्यास्ते।

यत्तदीयं बोधगम्यं तन्न मन्ये कल्पना,
यच्च तस्मिन् लोभनीयं तन्न मन्ये कल्पना।

दुःखसत्यं गौतमोऽप्याहेति तन्न निषिध्यते,
यच्च तस्मिन् रामणीयं तन्न मन्ये कल्पना।

तत्परिज्ञानं भवेन्नामापि शुष्कं व जडम्,
यच्च तस्मिंश्चर्वणीयं तन्न मन्ये कल्पना।

चित्तशुद्धिस्तस्य सन्देहास्पदं नैवास्ति मे,
यच्च तस्मिन् शङ्कनीयं तन्न मन्ये कल्पना।

तस्य रूपश्रीर्विभाव्या नैव मन्ये, सर्वथा,
यच्च तस्मिन् भावनीयं यन्न मन्ये कल्पना।

नोररीकुरुते कथञ्चिन्मे स ता उपलालनाः,
यच्च तस्मिन् लालनीयं तन्न मन्ये कल्पना।

दृष्टिपथमायाति नासौ हन्त निकटस्थोऽपि सन्,
यच्च तस्मिन् दर्शनीयं तन्न मन्ये कल्पना।

तस्य विषये जाग्रतीह सदा विकल्पपरम्पराः,
यच्च तस्मिन् कल्पनीयं तन्न मन्ये कल्पना।

तत्र कामानां न काचिद् गतिरितीह श्रूयते,
यच्च तस्मिन् कामनीयं तन्न मन्ये कल्पना।

सत्यमिति कृत्वाऽपि गृह्णीयादसौ ते भाषितम्,
यच्च तस्मै श्रावणीयं तन्न मन्ये कल्पना।

फलं कदाचिदमुष्य क्वचित् पुरो मिलिता,
प्रतीक्षसे यमिह त्वं क्वचित् पुरो मिलिता।

चलेः सुदूरमितश्चेतसा विकीर्णेन,
गवेषयन् स्वजनस्त्वां क्वचित् पुरो मिलिता।

न कण्टकैरिह भीतो भवेस्त्वमयनस्य,
स्रजं निधाय करे स क्वचित् पुरो मिलिता।

गृहाण वाणि ! जनिं मद्धृदङ्गणे मुग्धे,
अलङ्कृतः खलु भावः क्वचित् पुरो मिलिता।

पृषत्कणस्य नु तस्येह किं वदाम्येषः,
य एव शुक्तिपुटेऽब्धेः क्वचित् पुरो मिलिता।

सुतीव्रतां नय रे त्वं निजां हि शुश्रूषाम्,
मुरल्युपेतकरः स क्वचित् पुरो मिलिता।

सहस्व यन्मिलतीह त्वमप्रतीकारम्,
अभीप्सितं तव रे तत् क्वचित् पुरो मिलिता।

परैर्हि संख्यया बहुभिः किमेव निकटस्थैः,
स्वकीय एक इतः किं क्वचिद् पुरो मिलिता।

निरर्थकं किमपीदं न मुग्ध ते व्यथितम्,
श्रवःसमुत्सुक एव क्वचित् पुरो मिलिता।

दिनानि यापय पिक रे निजानि विरसानि,
रसालमोदितकालः क्वचित् पुरो मिलिता।

—१२—

स्वीयेषु न रमते परकीयेषु न रमते,
क्वापीह मनो मामकमेतेषु न रमते ।

पुनरेष चिन्तयामि पुनर्वा विमृशामि,
कथमेव मनो मामकमेतेषु न रमते ।

उद्यानमर्पितं सुभगं मे त्वयाऽधुना,
मम चित्तमस्य किञ्चन कुसुमेषु न रमते ।

नैराश्यमात्मनो मनसः किं निवेद्यताम्,
स्वार्थेषु न रमते च परार्थेषु न रमते ।

मनसः कृत एते मम ऋतवो ननु विफलाः,
वर्षासु न रमते च वसन्तेषु न रमते ।

जगति द्विवेह सन्ति जना हन्त मन्मनः,
रक्तेषु न रमते च विरक्तेषु न रमते ।

वैयाकुली स्वचित्तगता केन वार्यताम्,
पापेषु न रमते बत पुण्येषु न रमते ।

कालोऽन्य इतः स्यान्मनसो मे च कृते कः,
रजनीषु न रमते बत दिवसेषु न रमते ।

उद्यानकस्य ते शृणु चेतो हि मामकम्,
शाखासु न रमते बत पत्रेषु न रमते ।

प्रीतयो लक्ष्यन्ते तावकेषु हासेषु,
संयता वीक्ष्यन्ते तावकेषु पाशेषु ।

नैव कालिदासेषु नापि तच्च भासेषु,
यन्निशम्यते गीतं तावकेषु श्वासेषु ।

सन्ति साम्प्रतं सिद्धा यद्यपीह ये केचित्,
सिद्धयो दृश्यन्ते तावकेषु दासेषु ।

याति वृन्दावनत्वमात्मनो मनो मुदितम्,
सम्प्रवृत्तेष्वमीषु तावकेषु रासेषु ।

न श्रियो निवासेषु नापि धूपवासेषु,
यः सुगन्धिरुपलब्धस्तावकेषु वासेषु ।

नैव लक्ष्यते मृग्या या सुदृग्विलासेषु,
सा च पीयते कान्तिस्तावकेषु त्रासेषु ।

नो वसन्तमासेषु नापि वा पलाशेषु,
यादृशी छविर्मन्ये तावकेषु भासेषु ।

दृशं स्वस्मिंस्तदीयां निष्पतन्तीं को ह्युपेक्षेत,
घटां गेहेऽम्बुदानां सन्नमन्तीं को ह्युपेक्षेत ।

जनः स्वीयः स्ववाचा व्याहरेन्न व्याहरेदथवा,
दृशं किञ्चित्तदीयां व्याहरन्तीं को ह्युपेक्षेत ।

प्रसङ्गो वा न वा स स्यान्मदीये नाम्नि समभिहिते,
विकीर्णां मानसीं वृत्तिं भवन्तीं को ह्युपेक्षेत ।

मयोक्ते किञ्चिदुद्गलनेन कृष्टां हन्त तद्दृष्टिम्,
शनैरार्द्रोत्तरीयामुच्छलन्तीं को ह्युपेक्षेत ।

अरण्ये पुष्पिताभिर्वल्लरीभिः कस्य को लाभः,
लतां पार्श्वे तदेनामुन्मिषन्ती को ह्युपेक्षेत ।

अपेक्षैवास्ति तत्स्नेहस्य नाभिव्यञ्जने हेतुः,
उपेक्षामप्यहो स्वां व्यञ्जयन्तीं को ह्युपेक्षेत ।

सुदृष्टिं तामुपेक्षासहगतै रतिमात्रप्रतिकूलैः,
अभीष्टं सुस्वरैरुन्मीलयन्तीं को ह्युपेक्षेत ।

स्वकीयैर्भाग्यलब्धैः कैश्चिदेभिर्मृदुकरस्पर्शैः,
समग्रां वेदनां विनिवारयन्तीं को ह्युपेक्षेत ।

स एव सोऽपि परं लक्ष्यते स कोऽप्यन्यः,
मदीयभाग्यवशात् स्वोऽप्यहो स कोऽप्यन्यः।

य एव मामवदत् त्वां विना न जीवामि,
स एव सम्प्रति जातः क्षणेन कोऽप्यन्यः।

कदाचिदापणमध्ये न नीयते प्रणयः,
य एव तत्र हि विक्रीयते स कोऽप्यन्यः।

स्वधर्ममाचर सम्यङ् न किञ्चिदुपदिश माम्,
य एव मामुपदिशतीह रे स कोऽप्यन्यः।

मदीयमौनमिदं सर्वथा कुशल्यस्तु,
निवेदयेद् य इतो वेदनां स कोऽप्यन्यः।

पुरोऽपि नीयते पश्चादहो भवत्येव,
स एवमात्मगतो दृश्यते स कोऽप्यन्यः।

परापतन्ति विचारा हि तान्न वहु मन्ये,
विचारशून्य इतो यो मतः स कोऽप्यन्यः।

चयं मृदामिदमस्तित्वकं निजस्पर्शात्,
हिरण्मय ननु विदधीत यः स कोऽप्यन्यः।

चिरं जनस्य हि धूमायितं न बहु मन्ये,
य एव प्रज्वलतीव क्षणं स कोऽप्यन्यः।

पुरातनं नवतामानयेद् य ईक्षितकैः,
परोऽथवाऽपि निजः स्याज्जनः स कोऽप्यन्यः।

सर्वथा स्वं तत्पुरो विनिपात्य को दैन्यं नयेत्,
यो न शृणुते तं वृथा संश्राव्य को दैन्यं नयेत्।

नापि कश्चिच्चेष्टतां वा नापि कश्चिद् भाषताम्,
आत्मना सञ्चेष्टच वा सम्भाष्य को दैन्यं नयेत्।

क्षीयतामस्तित्वमेतद् गर्तमध्ये सङ्गतम्,
स्वेन नम्रीभूय वा स्वं हन्त को दैन्यं नयेत्।

आनुकूल्यायापि तद् रे प्रार्थितं दैन्यं न किम्,
स्वं पुरः प्रतिकूलतां गमितस्य को दैन्यं नयेत्।

त्रुटच रे त्वं सर्वथा त्रुटितस्य रे क्षतिरस्ति का,
वैतसीं वृत्तिं तु समधिष्ठाय को दैन्यं नयेत्।

मत्पिपासैवेयमुद्धाराय मेऽलं वर्तते,
तत्करान्मधुलब्धये स्वं हन्त को दैन्यं नयेत्।

स्वानुकूलं तद्विचेष्टितमेव रे तदनुग्रहः,
एतदर्थं स्वं परिश्राम्येह को दैन्यं नयेत्।

किञ्चिदौत्सुक्यं न जिज्ञासा न तस्मिन् मां प्रति,
स्वं ततः परिचाय्य तत्पुरतो हि को दैन्यं नयेत्।

कस्यचित् स्तुतये न चापि प्रशस्तये कविता मम,
स्वोदरस्य खलस्य हेतोः स्वं हि को दैन्यं नयेत्।

जगतीह कस्य चेतो न रमेत लोभनीये,
मनसोऽस्य किं वदेयं न रमेत लोभनीये।

भ्रमरस्य तस्य वाच्यं विषये किमेव यस्तु,
कुसुमे सुगन्धवन्द्ये न रमेत लोभनीये।

रम्याणि वीक्ष्य को वा नहि लुभ्यतीह किन्तु,
हृदयं मदीयमेतन्न रमेत लोभनीये।

ननु लोभनीयताख्यो गुण एष कोऽप्यपूर्वः,
इह भाग्यहीन एवं न रमेत लोभनीये।

किमु लोभनीयतेयं छलनेव तस्य, चेतः,
मम सन्दिहानमेतन्न रमेत लोभनीये।

दृढमस्ति बन्धनं किं भुवि वस्तु लोभनीयम्,
मन आत्मतन्त्रमेतन्न रमेत लोभनीये।

रतमस्ति चन्द्रिकायां नियतं हि यस्य चेतः,
क्षणमातपे स एवं न रमेत लोभनीये।

अहमेव हन्त जाने चरितं न चेतसोऽस्य,
कथमीदृशे यदेतन्न रमेत लोभनीये।

साधं न हन्त कोऽपि गतः सर्वतो मया,
आसादितो न कोऽपि निजः सर्वतो मया।

एकाकितैव मेऽभवदेका तु सहचरी,
सकलः परीक्षितो हि जनः सर्वतो मया।

एकाकिनो जनस्य हि दिवसा न यान्त्यमी,
एवञ्च यापितो दिवसः सर्वतो मया।

अहमेव दुःखहेतुरमीषां तु यद्यपि,
दुःखी कृतो न कोऽपि जनः सर्वतो मया।

प्रणयस्य सर्व एव पथि प्रस्थिता अमी,
प्रणयी न दृष्ट एव जनः सर्वतो मया।

प्राप्ता हि कण्टका अपि मृदवो मया परम्,
नाप्तं मृदु प्रसूनमितः सर्वतो मया।

कस्मिन् निजत्वदृष्टिरसौ सम्भवेन्मम,
दृष्टस्तु यद्यपीह निजः सर्वतो मया।

आत्मीयतां गते मम सकलेऽपि कोऽप्यहो
नैव श्रुतो मदीयजनः सर्वतो मया।

भवते निवेदनीयमिदं नास्ति सर्वथा,
भवता विचारणीयमिदं नास्ति सर्वथा।

कुटिलस्य वा विधातुरिदं सम्भवेन्मतम्,
भवता परीक्षणीयमिदं नास्ति सर्वथा।

मिलिता मिलन्ति हन्त मिलिष्यन्ति मादृशाः,
भवता विकल्पनीयमिदं नास्ति सर्वथा।

हृदयं तु मामकं बत सकलैर्निवारितम्,
भवता निवारणीयमिदं नास्ति सर्वथा।

जगतीह सर्व एव विनिन्दन्ति मन्मतम्,
भवता विनिन्दनीयमिदं नास्ति सर्वथा।

निहितं निजत्वमेव मया भवति केवले,
भवता विमाननीयमिदं नास्ति सर्वथा।

हृदयं ममेह केन न केन प्रवञ्चितम्,
भवता प्रवञ्चनीयमिदं नास्ति सर्वथा।

उच्छिष्टकल्पमस्ति यदस्तित्वकं ततः,
भवते समर्पणीयमिदं नास्ति सर्वथा।

—१३—

प्राप्तमेतत् किन्नु हातुं शक्यते,
तस्य हस्तात् किन्नु पातुं शक्यते ।

यस्य कस्याप्यग्रतः करुणान्वितम्,
गीतमेतत् किन्नु गातुं शक्यते ।

यो न स्निह्यत्येव तस्मै सर्वथा,
देयमेतत् किन्नु दातुं शक्यते ।

यो महद्भिर्मेयतो न गतः क्वचित्,
सोऽथ लघुभिः किन्नु मातुं शक्यते ।

स्वागतार्थं यो न किञ्चिच्चेष्टते,
तस्य गेहं किन्नु यातुं शक्यते ।

यस्य सविधे नैव सिध्येत् प्रार्थितम्,
तस्य गेहे किन्नु स्थातुं शक्यते ।

स्नेहरहितस्येह तस्य करादिदम्,
इष्टमपि मधु किन्नु पातुं शक्यते ।

नैकशो बहुभिः प्रसूनं कोमलम्,
घ्रातमेतत् किन्नु घ्रातुं शक्यते ।

तस्य मुग्धस्येह मुग्धं सुस्मितम्,
हृन्निविष्टं किन्नु हातुं शक्यते ।

वर्त्मानि भवन्त्येवं कस्यापि सुगन्धीनि,
चलितानि सुगन्धीनि हसितानि सुगन्धीनि।

किमपीव लसत्यन्तः कमनीयकमुद्यानम्,
कस्यापि भवन्त्येवं स्मरणानि सुगन्धीनि।

सुहृदामतिस्निग्धानां केषामपि मुग्धानाम्,
भाग्येन भवन्त्येवं मिलितानि सुगन्धीनि।

वहुधा स्मृतिमायान्ति कस्यापि 'छइल्लस्य',
लसितानि सुगन्धीनि हसितानि सुगन्धीनि।

स्वजनस्य नु कस्यापि मिलितं मृदु येष्वासीत्,
आयान्ति पुनर्नैवं सुदिनानि सुगन्धीनि।

सुमनांसि न जायन्ते सकलानि सुगन्धीनि,
सुमनांसि तु सहजानि सकलानि सुगन्धीनि।

यानीह सुवर्णानि नहि तानि सुगन्धीनि,
भाग्येन सुवर्णानि कलितानि सुगन्धीनि।

भाषितं तन्न भाषितं मन्ये,
शोभितं तन्न शोभितं मन्ये ।

भाषितं यच्च तस्य मृदु शिष्टम्,
तच्च नाहं सुभाषितं मन्ये ।

केवलं यत्सरागमीक्षितकम्,
तच्च नाहं सुवीक्षितं मन्ये ।

शिक्षितं येन स्वस्य लाभार्थम्,
शिक्षितं तन्न शिक्षितं मन्ये ।

यस्य पीडाऽश्रुभिर्भवेद् व्यक्ता,
पीडितं तन्न पीडितं मन्ये ।

तन्मया विस्मृतं स्वदौर्भाग्यात्,
किञ्चिदासीत् तदिङ्गितं मन्ये ।

केनचिल्लक्षितं न तद्दृष्ट्या,
तस्य मौनस्य भाषितं मन्ये ।

हन्त कोलाहलैर्न यत्साध्यम्,
तच्च मौनेन साधितं मन्ये ।

यद् विकसितं वनेषु कुसुमानाम्,
तच्च तस्यैव सुस्मितं मन्ये ।

यदेतत् तस्य सम्परिकल्पनीयं तन्न सह्यं मे,
दृशोस्तस्येह यत्परिवर्तनीयं तन्न सह्यं मे।

उदाराणां भवन्त्येवं जनानां दृष्टयो भिन्नाः,
दृशोस्तस्येह यत्समुदीरणीयं तन्न सह्यं मे।

पुरा वचनैः प्रवेशो मामकीनः स्वीकृतस्तेन,
इदानीं तद्दृशा यद् वर्जनीयं तन्न सह्यं मे।

स एवाहं य एतस्यां सभायामासमनिवार्यः,
यदेतत् साम्प्रतं मद्वारणीयं तन्न सह्यं मे।

यदिष्टं तस्य तेनैवेह मान्यं स्वीकृतं शिरसा,
यदेतत्तस्य मय्यपि शङ्कनीयं तन्न सह्यं मे।

विरोधो नावयोरवशिष्यते कश्चित् तथापीदम्,
मदग्रे यन्मुखस्य प्रतारणीयं तन्न सह्यं मे।

न दूरस्थेन काचिन्नापि निकटस्थेन हानिर्मे,
सशङ्कं तस्य यन्मयि वीक्षणीयं तन्न सह्यं मे।

न कश्चिद् वर्तते साक्षी सभायां हन्त यत्पक्षे,
असत्यं यस्य तत्खलु भाषणीयं तन्न सह्यं मे।

न दूये तस्य रे हसितेन मामभिलक्ष्य किञ्चिद् वा,
यदन्येषां मयीत्थं हासनीयं तन्न सह्यं मे।

'जगन्नाथ' त्वदीयं भाषितं नो बाधते किञ्चित्,
त्वदीयं यच्च मौनं यापनीयं तन्न सह्यं मे।

स्यात्पीडितो हि कोऽपि न वचनीयमन्यथा,
मूकेन भाव्यमेव न वचनीयमन्यथा ।

समुदीरितेन किं वद सिद्धं तवेयता,
कश्चिद् वदेत् त्वयेह न वचनीयमन्यथा ।
हृदयं जनस्य कोमलमधिकं न वेत्सि किम्,
त्रुट्येदिदं कदापि न वचनीयमन्यथा ।
मुग्धो जनः स्वमेव न जानाति भाषितम्,
चतुरेण च त्वयेह न वचनीयमन्यथा ।
भ्रान्ता भवन्ति हन्त विदग्धा अपीह चेत्,
मुग्धेन च त्वयेह न वचनीयमन्यथा ।
नेपथ्य एव कश्चन शृण्वन् भवेज्जनः,
वाच्यं शनैर्विलोक्य न वचनीयमन्यथा ।
द्वेषस्य वा भवेदथ रागस्य समुदयः,
श्रोतव्यमन्यथा न, न वचनीयमन्यथा ।
प्रतिभाति यद् हितं तव, वाच्यं तदेव रे,
हितमप्रियं कदापि, न वचनीयमन्यथा ।
रुदितस्य नैव वेत्सि प्रकारानिमानपि,
हसितं निरीक्ष्य तस्य न वचनीयमन्यथा ।
जानासि 'जगन्नाथ' न भाग्यं तवेह कः,
सविधे हि यस्य कस्य न वचनीयमन्यथा ।

जीवन् न जीवतीह य एषोऽस्म्यहं सखे,
यं कोऽपि धारयेन्न स भारोऽस्म्यहं सखे।

मत्तः स्वरो न कोऽपि समुदयेत् कदाचन,
मां ताडयेन्न कोऽपि न पटहोऽस्म्यहं सखे।
साहाय्यमाचरेदिह पवनः कथं नु मे,
त्वद्द्वारमुद्व्रजामि न गन्धोऽस्म्यहं सखे।
प्रासादमेत्य ते कथमेव स्वरैर्निजैः,
त्वां सन्दिशानि हन्त न विहगोऽस्म्यहं सखे।
त्वं मे कियत् कियन्नहि दातुं समुद्यतः,
ग्रहणे समर्थ एष न चषकोऽस्म्यहं सखे।
दूरादुपेत्य स्नेहभरे दीपके क्षणात्,
स्वं यः समर्पयेत् स न चषकोऽस्म्यहं सखे।
नाद्यावधीह यस्य तृषा मूलतो गताः,
पाने कृतेऽपि कोऽपि स तृषितोऽस्म्यहं सखे।
आदाय मूर्ध्नि कोऽपि कथं मां प्रसाधयेत्,
कुसुमस्य हन्त कोऽपि न स्तबकोऽस्म्यहं सखे।
भाग्यस्य प्रातिकूल्यवशादेव त्वद्गृहात्,
निःसारितो न सन्नपि चलितोऽस्म्यहं सखे।
त्वां वच्मि 'जगन्नाथ' न तस्मिंस्तु विश्वसेः,
छलितो भवेस्तथैव हि च्छलितोऽस्म्यहं सखे।

अभाग्यं विद्धि तं लोके न यस्मिन् दैन्यमस्त्येवम्,
स मान्यो नैव तद्गोष्ठ्यां न यस्मिन् दैन्यमस्त्येवम्।

किंयद् वा तत्र पाण्डित्यं कियद् वा तत्र सौन्दर्यम्,
न मान्यत्वं तदीयं चेन्न यस्मिन् दैन्यमस्त्येवम्।

न दृष्टिं पायिनी निदधाति तस्मिन्, तं न स्वीकुरुते,
तदाकिञ्चन्यमूलं वा न यस्मिन् दैन्यमस्त्येवम्।

स सौख्येनैव सकलेनेह परितोष्यो भवेन्नाम,
कृपायाः पात्रमिह नासौ न यस्मिन् दैन्यमस्त्येवम्।

स शोच्यो हन्त लोके तस्य रे व्यर्थं भवेज्जन्म,
पिपासासङ्गतं किञ्चिन्न यस्मिन् दैन्यमस्त्येवम्।

स सर्वस्यैव योग्यो वाऽस्तु लाभस्येह, स न योग्यः,
तदीयद्वार्येपि स्थातुं न यस्मिन् धैर्यमस्त्येवम्।

तमेव व्यर्थमस्यां यापितं मन्ये जगत्यां रे,
समुद्यत्सौमनस्यं वा न यस्मिन् दैन्यमस्त्येवम्।

कियत्साफल्यमस्मिन् वाऽस्तु लोके, सर्वमपि शून्यम्,
स कश्चित् सर्वथा विफलो न यस्मिन् दैन्यमस्त्येवम्।

'जगन्नाथ' त्वमस्मिन् प्राप्नुयाः सुतरामनाथत्वम्,
भजत्येवं स वैफल्यं न यस्मिन् दैन्यमस्त्येवम्।

यैश्च कैश्चिद् वा प्रकारैर्यापनीयत्वं गतम्,
जीवनं किं जीवनं यद् यापनीयत्वं गतम् ।

मां विलोभय न प्रभाभिर्दन्तपङ्क्तेः सुस्मिते !
अन्धकारे केवलेऽस्मिन् यापनीयत्वं गतम् ।

तस्य दुःखं को विजानातु स्थितश्छायातले,
जीवनं यस्यातपेऽस्मिन् यापनीयत्वं गतम् ।

कश्चिदेवं नैव रे दुःखाकुरु स्वैर्भाषितैः,
जीवनं नैवं तव स्याद् यापनीयत्वं गतम् ।

यापितानां सन्तपन्त्यां सन्ततं रे मरुभुवि,
मादृशां किं जीवनं यद् यापनीयत्वं गतम् ।

यस्य चित्ते नाभवत् कश्चिद् व्यथायाः समुदयः,
तस्य व्यर्थं सर्वमेवं यापनीयत्वं गतम् ।

सर्वथा कालो न यातः साम्प्रतं याता वयम्,
जीवनं कस्येह नैवं यापनीयत्वं गतम् ।

क्षणमपि न्यपतत् त्वदीया यत्र दृष्टिः सस्पृहा,
सार्थकं तज्जीवनं रे यापनीयत्वं गतम् ।

कस्य कस्य निवेद्यतां दुःखं स्वकीयं साम्प्रतम्,
सर्वमपि दुःखे यदीदं यापनीयत्वं गतम् ।

रे 'जगन्नाथ' त्वमद्यावधि कथं न निवर्तसे,
त्वां हठोऽयं मारयिष्यति यापनीयत्वं गतम् ।

रूपं ननु तस्या न च प्रकटं न च गुप्तम्,
ज्ञेयं तु कथं यन्न च प्रकटं न च गुप्तम् ।

आवृत्य च किञ्चित् स्वमुखं तिष्ठति सेयम्,
दृश्यं तु कथं यन्न च प्रकटं न च गुप्तम् ।

किं नाम मदाकर्षणनाटचस्य कलैषा,
यदकारि तया स्वं न च प्रकटं न च गुप्तम् ।

अभिवृद्धिमुपैतीव न लावण्यमतीव,
तदकारि तयाऽऽस्यं न च प्रकटं न गुप्तम् ।

कथमेव मनः स्यान्न हृतं स्निग्धजनानाम्,
तद्भाषितमास्ते न च प्रकटं न च गुप्तम् ।

तस्या उपमीयेत मुखं केन यदेतत्,
अवगुण्ठितमेवं न च प्रकटं न च गुप्तम् ।

इदमेव नु किं तस्य रहस्यस्य रहस्यम्,
आकर्षणमित्थं न च प्रकटं न च गुप्तम् ।

जानातु क एवं तव जाग्रत् तव सुप्तम्,
त्वद्रूपमहो यन्न च प्रकटं न च गुप्तम् ।

कलनं तु कलाकार ! किमेतत् तव मुग्धम्,
आकर्षकमित्थं न च प्रकटं न च गुप्तम् ।

जानीहि 'जगन्नाथ' दृशोः संगतकं तत्,
तस्या ननु जालं न च प्रकटं न च गुप्तम् ।

आर्द्रयेच्चित्तमहो कस्य मदीयं व्यथितम्,
कस्य व्यथिताय भवेन्नाम मदीयं व्यथितम् ।

सर्व एवेह विजानन्ति मदीयं हसितम्,
कोऽपि जानाति न जगतीह मदीयं व्यथितम् ।

नीयतां हन्त शमं कस्य हि विनिवेद्येदम्,
चेष्टतां श्रोतुमिदं कश्च मदीयं व्यथितम् ।

हन्त भणितानि मदीयानि मदीयं व्यथितम्,
मौनमेतच्च विशेषेण मदीयं व्यथितम् ।

आत्मनः कञ्चन सदृशं व्यथमानं वीक्षे,
वर्धते हन्त ततोऽपीह मदीयं व्यथितम् ।

नैवमश्रूणि समुदितानि, न मे रुदितानि,
किञ्चिदव्यक्तमवेद्यञ्च मदीयं व्यथितम् ।

किञ्चिदजनीदमिहैतेन च मे सौहार्दम्,
मां विहायेह कुतो यातु मदीयं व्यथितम् ।

आत्मनीदं मम भारो नु मदीयास्तित्वम्,
वर्धमानं सह वयसेव मदीयं व्यथितम् ।

यच्च सहजं नहि तस्मात्तदुपायो मुक्तेः,
किञ्चिदित्थं मम प्रतिभाति मदीयं व्यथितम् ।

नैव भेदोऽस्ति 'जगन्नाथ' द्वयोर्वा कश्चित्,
यत्तदीयं हसितं तच्च मदीयं व्यथितम् ।

विद्धि किञ्चिन्मामकं तस्यैव माम्,
विद्धि किञ्चित् साक्षिकं तस्यैव माम् ।

स्वं यशोगानं न यः शुश्रूषते,
विद्धि रे वैतालिकं तस्यैव माम् ।

यत्र नोद्याने वसन्तो ह्यागतः,
विद्धि रे मुषितं पिकं तस्यैव माम् ।

यो न किञ्चिद् हृद्गतं स्वं भाषते,
विद्धि रे सद्वाचिकं तस्यैव माम् ।

यत्र सूत्रे न प्रगल्भन्ते बुधाः,
विद्धि रे सद्वार्तिकं तस्यैव माम् ।

यत्र देशे नो मिलन्ति ग्राहकाः,
विद्धि रे व्यापारिकं तस्यैव माम् ।

यत्र गन्धज्ञा न देशे सन्त्यहो,
विद्धि रे सौगन्धिकं तस्यैव माम् ।

यत्र सङ्गीतं न देशे जानते,
सिद्धि रे तौर्यत्रिकं तस्यैव माम् ।

कोऽप्यनाथोऽहं जगन्नाथोऽभवम्,
विद्धि रे सौस्नातिकं तस्यैव माम् ।

तदेव मे बहु तद्वाचिकं मिलेत् किञ्चित्,
समीपमेत्य मदिष्टं स्वयं मिलेत् किञ्चित् ।

तदस्तु मूल्यवदथवा ह्यतीव सामान्यम्,
प्रियस्य तस्य करात् काङ्क्षितं मिलेत् किञ्चित् ।

मदीयप्रार्थितमेतत् कदा फलिष्यति रे,
व्यथेति किञ्चिदहो सत्फलं मिलेत् किञ्चित् ।

कियद् वहेयमिदं जीवनं महाभारम्,
तवैकवारमहो सङ्गतं मिलेत् किञ्चित् ।

ममापि काङ्क्षितमस्त्येत्र दूरमुड्डयनम्,
सुपक्षतिद्वयमप्यक्षतं मिलेत् किञ्चित् ।

नयामि कुत्र शमं स्वं सदातपे ज्वलितम्,
पथीह कुत्रचिदुद्यानकं मिलेत् किञ्चित् ।

कुतोऽत्रयेरिह तिष्ठन्तु भिक्षवो द्वारि,
न - मात्रमेकमितीहाक्षरं मिलेत् किञ्चित् ।

कियन्निजं मुखमुन्नम्य वर्ततां विहगः,
पयोधरात् पृषदेकं क्षणं मिलेत् किञ्चित् ।

त्वमेव वेत्सि मदीयं विलम्बितं व्यथितम्,
महौषधं तव हस्ताद् द्रुत मिलेत् किञ्चित् ।

ददाति यच्च 'जगन्नाथ' मन्यतां बहु तत्,
प्रतीक्षतां न पुनर्यद् भृशं मिलेत् किञ्चित् ।

जीवने हन्त मया तस्य च किं किं न सहे,
तस्य भणितं न सहे तस्य विहसितं न सहे ।

तस्य चित्ते नहि जागर्ति कुतोऽपि प्रीतिः,
एवमप्यात्मन आशङ्कितमधिकं न सहे ।

निर्भरं तस्य कृपायां मम जातं श्वसितम्,
स्वस्य दौर्बल्यमहो साम्प्रतमेतन्न सहे ।

जायते हन्त न कारुण्यमहो तस्य हृदि,
यत्कृतामेवमुपेक्षां यदसह्यां न सहे ।

न क्षतिस्तस्य निधेरस्ति नु मह्यं दाने,
तस्य कृपणत्वमहो किञ्चिदसह्यं न सहे ।

निष्फलैवाभवदेषाऽपि मदीया याच्ञा,
भिक्षुकत्वं ननु भारं निजमेवं न सहे ।

सर्वथा संहर कोलाहलमस्मिन् काले,
हन्त समयस्य कथञ्चिन्नु विघटनं न सहे ।

त्वां तृणायैव 'जगन्नाथ' समे मन्यन्ते,
त्वदृशस्याहमुपेक्षां क्षणमेवं न सहे ।

मदीयं भाषितं तस्या यदि स्यात् प्रीतये किञ्चित्,
परं लाभान्न तस्मान्मे भुवि स्यात् प्रीतये किञ्चित्।

तदीयस्येह दृक्कोणस्य लब्धा स्वीकृतिर्येन,
कवित्वं तत् तत्कवित्वं तच्च मे स्यात् प्रीतये किञ्चित्।

व्यथायाः सार्थकत्वं नाम तस्या एव मन्येऽहम्,
कदाचिद् या तदीयाया यदि स्यात् प्रीतये किञ्चित्।

मदस्तित्वं किमप्यद्यावधीदं दुर्वहं मन्ये,
न यदभून्नाम तस्याः प्रीतिमत्याः प्रीतये किञ्चित्।

प्रसूने हन्त तस्मिन्नेव सौगन्ध्यं च सौन्दर्यम्,
विलासिन्या नु तस्या यच्च जातं प्रीतये किञ्चित्।

मदीयं सर्वमपि वैफल्यमुपगच्छेन्नु साफल्यम्,
यदेतन्नाम तस्याः सम्प्रति स्यात् प्रीतये · किञ्चित्।

तदेवास्मिन् सुगीतं किञ्च सङ्गीतत्वमाप्नोति,
उपेतं कर्णयोस्तस्या यदि स्यात प्रीतये किञ्चित्।

अवाप्तः स्पर्शमङ्गुल्याः स्वरः स्पृहणीयतां भजते,
सुतन्त्रीसम्भवो यः स्यान्नु तस्याः प्रीतये किञ्चित्।

मदीयं भाषितं न सुभाषितत्वं सम्प्रपद्येत,
नहि स्यात् कर्णगं तस्या नहि स्यात् प्रीतये किञ्चित्।

'जगन्नाथ' त्वदीयं सार्थकत्वं को नु मन्येत,
कदाचित् त्वं भवेर्यावन्न तस्याः प्रीतये किञ्चित्।

हानिरस्त्येव ते न मे हानिः,
उच्यतामुच्यतां न मे हानिः ।

हानिलाभाविमावतिक्रान्तौ,
नापि लाभस्तथा न मे हानिः ।

नाटकं नैष रे मम प्रणयः,
पश्य नो पश्य वा, न मे हानिः ।

रोचते तद् विधेहि यत् तुभ्यम्,
पृच्छ नो पृच्छ वा न मे हानिः ।

येन भग्नं नु मामकं हृदयम्,
तस्य हानिर्हि सा न मे हानिः ।

तेन दत्तं न किञ्चिदपि मह्यम्,
भिक्षुकस्येह वा न मे हानिः ।

यस्य रुदितं सदैव रे प्रकृतिः,
तस्य जगतीह वा न मे हानिः ।

चिन्तयत्येष मां न चेल्लोकः,
तस्य हानिः परं न मे हानिः ।

तस्य हानिः श्रुतं न यत् तेन,
भाषमाणस्य वा न मे हानिः ।

मा 'जगन्नाथ' तद्गृहं याहि,
हानिरस्त्येव ते, न मे हानिः ।

अन्यत्र सुसिद्धं तत आप्तं तदसिद्धम्,
बहुयत्नवशाद् यत् समवाप्तं तदसिद्धम् ।

नैष्फल्यमिदं कस्य हि वक्तव्यमिवाग्रे,
यत्साधितमतियत्नत आप्तं तदसिद्धम् ।

यच्चित्तनभःप्राङ्गणे सन्नद्धमिदानीम्,
तस्य स्मितमात्रेण समाप्तं तदसिद्धम् ।

तस्यैव परामर्श इदानीमतिशेते,
यच्चिन्तितमासीन्मम सर्वं तदसिद्धम् ।

सुहृदां परिहासस्य हि पात्रं समभूवम्,
यद् यन्मम सिद्धं ननु सकलं तदसिद्धम् ।

विपरीतमियन्मात्रमिदानीं मम भाग्यम्,
सर्वस्वमहो यन्मम, जातं तदसिद्धम् ।

एषा तु कृपा तस्य निराकाङ्क्ष इहास्मि,
यत्काङ्क्षितमासीन्मम सर्वं तदसिद्धम् ।

सुखिनां ननु गणनीय इतोऽहं न हि श्रेण्याम्,
यन्नाम सुखित्वं मम पक्षे तदसिद्धम् ।

बहवो निजकार्यं हि सिसाधयिषव एते,
तेष्वस्मि न, यद् यन्मम रे तत्तदसिद्धम् ।

नास्त्येव 'जगन्नाथ' कथञ्चित् तव दोषः,
यद् यत् तव पश्यामि कथं तत् तदसिद्धम् ।

—१५—

त्वादृशामाश्रितस्य किं भविता,
प्रेम्णि दूरे गतस्य किं भविता।

यो हि चित्तेन दूरगो जातः,
सन्निधानेन तस्य किं भविता।
नैवमस्तीह जीवनोपायः,
प्रेम्णि ते जीवितस्य किं भविता।
कण्टका यत् पदे पदे सन्ति,
त्वत्पथे प्रस्थितस्य किं भविता।
सुन्दरं त्वं शिवं तव प्रेम,
एवमास्थायुतस्य किं भविता।
तेजसा न त्वयेह योगश्चेत्,
स्नेहपरिपूरितस्य किं भविता।
मामुपेत्येह केऽपि पृच्छन्ति,
त्वादृशो दुर्गतस्य किं भविता।
त्वद्गृहं संश्रितोऽद्य शोचामि,
त्वद्गृहान्निर्गतस्य किं भविता।
जीवनं मृत्युरेव यस्यास्ति,
तस्य नूनं मृतस्य किं भविता।
यस्य नास्तीह किञ्चिदस्तित्वम्,
तेन रे जीवितेन किं भविता।
किं 'जगन्नाथ' ते ह्यलङ्कारैः,
अत्र तेऽलङ्कृतस्य किं भविता।

नैव किञ्चिन्ममास्ति वक्तव्यम्,
मादृशानां किमस्ति वक्तव्यम् ।

नैवमेतन्न वाक्कलां जाने,
किञ्च तदपीह नास्ति वक्तव्यम् ।

किञ्चिदुत्कण्ठते न यः श्रोतुम्,
तं प्रतीदं न मेऽस्ति वक्तव्यम् ।

पूरितान्मधु यथोच्चलेच्चषकात्,
तस्य दृग्भ्यां तथाऽस्ति वक्तव्यम् ।

तत्स्मितं तस्य स्वीकृतिं मन्ये,
अन्यदस्मात् किमस्ति वक्तव्यम् ।

पूर्णकामश्च कः कृतस्तेन,
कस्य तेन श्रुतञ्च वक्तव्यम् ।

लौकिको मात्रमेष व्यवहारः,
अन्यथा कस्य केन वक्तव्यम् ।

स्थापितस्तस्य तेन सम्बन्धः,
यं प्रति स्याच्च यस्य वक्तव्यम् ।

नैव विदितं हि यस्य चित्तस्थम्,
तस्य, सविधे किमेव वक्तव्यम् ।

को 'जगन्नाथ' त्वां कविं मनुते,
श्रूयतां किं तवापि वक्तव्यम् ।

दुःखमात्रं जीवनं रे त्वां विना,
जीवनं किं जीवनं रे त्वां विना।

मत्कथेयं श्रूयतां केनाथवा,
मूकमूकं जीवनं रे त्वां विना।

भग्नतां याता नु हृत्तन्त्री मम,
नीरवं सङ्गीतकं रे त्वां विना।

प्रश्न एषोऽद्यावधि ह्यसमाहितः,
दीयतां केनोत्तरं रे त्वां विना।

नीयतामुद्यानमेतत् केन मे,
सत्सुमं सत्सौरभं रे त्वां विना।

केन भिषजा हन्त रुग्णायेह मे,
दीयतां शुभमौषधं रे त्वां विना।

शुष्कसर एतन्नु केन विधीयताम्,
साम्प्रतं सज्जीवनं रे त्वां विना।

सव्यथं व्यथितेन केन निशम्यताम्,
मामकं विनिवेदनं रे त्वां विना।

केन नीरक्षीरयोर्नु विधीयताम्,
हंसशील ! विवेचनं रे त्वां विना !

को 'जगन्नाथस्य' जानातु व्यथाम्,
व्यर्थमस्त्यनुशीलनं रे त्वां विना।

त्वां विना जगतीह दीनं पश्य माम्,
ज्योत्स्नया शशिनं विहीनं पश्य माम् ।

सागरे त्वयि विन्दुवत् सुमहीयसि,
सार्धमस्तित्वेन हीनं पश्य माम् ।

एष योऽहं हन्त सोऽहं सर्वथा,
तावकोऽहं तावकीनं पश्य माम् ।

मान्य एषोऽहं न मान्यो वा तव,
सर्वथा रे त्वय्यधीनं पश्य माम् ।

स्निह्य रे मह्यं नहीत्थं क्रुध्य रे,
तप्तमरुम्रियमाणमीनं पश्य माम् ।

योऽस्मि सोऽस्मि तवैव तिष्ठंस्त्वत्पुरः,
त्वं पुराणं वा नवीनं पश्य माम् ।

तेजसीह पुरः स्थिते त्वयि वा द्रवत्,
मृदुतया हैयङ्गवीनं पश्य माम् ।

ज्योतिरसि सद्व्योम ते वसतिर्मता,
दूरतोऽपि क्षणं कु-लीनं पश्य माम् ।

तावदस्मि पतन्ति किरणास्त्वद्दृशोः,
नो मयीह, तुषारक्षीणं पश्य माम् ।

लघुजगन्नाथः कियद् वाऽऽकारयेत्,
तं ततो द्रुतमात्मनीनं पश्य माम् ।

कीदृशी जागर्ति मयि कापि व्यथा,
त्वत्कृता सौन्दर्यमयि कापि व्यथा।

यस्य रे व्यथितं स्वभावस्तत्कृते,
वस्तु नैव नवीनमयि कापि व्यथा।

यो मया लब्धो ह्यलब्धो वर्तते,
तद्विषयिणी मेऽलमयि कापि व्यथा।

यस्य प्रणये श्रीगणेशस्तत्कृते,
वर्धितो वा वह्निरयि कापि व्यथा।

अन्तरन्तः परिचितावावां यतः,
मत्कृते सौभाग्यमयि काऽपि व्यथा।

त्वं न लब्धा चेद् भवेदिह जीवने,
मत्कृते रे दैन्यमयि कापि व्यथा।

स्वल्परस्यापीह मे तमसि स्थितिः,
त्वां प्रतीयं दीप्तिमयि कापि व्यथा।

वात्यया लतिकेव हन्त विधूयते,
त्वद्दृशेह मदन्तरयि कापि व्यथा।

मद्धृदयचषकस्त्वया ननु खण्डितः,
जायते कथयाऽलमयि कापि व्यथा।

अस्म्यनाथो रे 'जगन्नाथो'ऽप्यहम्,
त्वं ममैकैवालमयि कापि व्यथा।

गन्तव्यमस्ति दूरमरे किं विलम्ब्यते,
शनकैः पदात् पदं न चलेः, किं विलम्ब्यते ।

कालो नु धावतीह रयेणेव वाजिनाम्,
शैथिल्यमात्मनो नु त्यजेः किं विलम्ब्यते ।

त्वां रे विहाय दूरमितः के न के गताः,
त्वं तिष्ठसीह हन्त चलेः, किं विलम्ब्यते ।

यावन्न मृत्युरेति, न विश्राम एष ते,
लक्ष्यं सुदूरमस्ति चलेः, किं विलम्ब्यते ।

भविता महद्भिरेव तरङ्गैर्नु सङ्गमः,
तट एव तिष्ठसीह चलेः, किं विलम्ब्यते ।

कलितं मयेह जीवनमेतद्धि नाटकम्,
मृत्यो ! त्वमेहि शीघ्रमरे, किं विलम्ब्यते ।

मिलितं तरङ्गितं हि भ्रुवोस्तस्य ते पुनः,
नैवेह तिष्ठ मित्र ! चलेः, किं विलम्ब्यते ।

मायाविनो जनस्य न जानासि रे गतीः,
स्थानादितस्तदाशु चलेः, किं विलम्ब्यते ।

किं स्मर्यते त्वया नहि तस्योत्सुकमक्षि,
चषकं त्यज त्वमाशु चलेः किं विलम्ब्यते ।

शैथिल्यमेव त्वां नु 'जगन्नाथ' नाशयेत्,
तिष्ठन् यतस्ततो न भवेः किं विलम्ब्यते ।

दृष्ट्वा प्रयाति हन्त न कश्चित् शृणोति मे,
आकारयामि हन्त न कश्चित् शृणोति मे।

शृण्वन्ति सर्व एव हि मिथ्यापि तद्वचः,
सत्यं वदामि हन्त न कश्चित् शृणोति मे।

व्यवहार एव मां ननु व्यवसाययत्यसौ,
कियदालपामि हन्त न कश्चित् शृणोति मे।

शृण्वन्ति यद्यपीह समे मां तथाप्यहो,
कर्णं ददाति हन्त न कश्चित् शृणोति मे।

दृष्ट्वैव नात्र कैर्नहि मूकायितं पुरा,
अवलोकितं मयाऽपि न कश्चित् शृणोति मे।

श्रुतमश्रुतं करोति नु प्रकृतिर्जनस्य चेत्,
नाश्चर्यमस्ति हन्त न कश्चित् शृणोति मे।

विलपामि किञ्च सम्प्रति क्रन्दापि निर्भरम्,
बधिरः कुतोऽपि हन्त न कश्चित् शृणोति मे।

दूरात् प्रमत्त इत्यथ परिचाययन्ति माम्,
स्वजनोऽपि तेन हन्त न कश्चित् शृणोति मे।

भविता वनेषु तेऽपि 'जगन्नाथ' रुदितकम्,
रोदिष्यतीव हन्त न कश्चित् शृणोति मे।

पश्यन्ति संशयेन कथं मामिमे जनाः,
नमयन्ति वा बलेन कथं मामिमे जनाः।

व्यर्थानि बन्धनानि मयीमेऽपि जानते,
बध्नन्ति बन्धनेन कथं मामिमे जनाः।
जगतीह परिवृतो नहि तिष्ठामि कुत्रचित्,
परिवारयन्ति स्वेन कथं मामिमे जनाः।
निजमेव वर्त्म चेद् यदि विदितं न मेऽधुना,
पृच्छन्ति वर्त्म तेन कथं मामिमे जनाः।
मम किञ्चिदस्ति नैव हि प्रकृतौ निवर्तनम्,
विनिवारयन्ति तेन कथं मामिमे जनाः।
येनेह गन्तुमेव न शक्नोम्यहं पथा,
परिचालयन्ति तेन कथं मामिमे जनाः।
जानन्त्यमी हठं मम, तिष्ठन्तमप्यहो,
उत्थापयन्ति तेन कथं मामिमे जनाः।
यद्येष यत्र तत्र निपतितोऽहमात्मना,
विनिपातयन्ति तेन कथं मामिमे जनाः।
अर्हामि दातुमेव परस्मै न चेदहम्,
याचन्त एव तेन कथं मामिमे जनाः।
जानन्ति 'जगन्नाथ'मनाथं समे पुनः,
आकारयन्ति तेन कथं मामिमे जनाः।

जीवनं तनुते विकीर्णं काचिदस्तव्यस्तता,
कुरुत उद्यानं विशीर्णं काचिदस्तव्यस्तता।

सर्वथा वाह्यवैमेषा किं न वा विदधीत मे,
जीवनं जरयेव जीर्णं काचिदस्तव्यस्तता।

कश्चिदनुरागोऽपि लाभायेह जायेत क्वचित्,
तं नु सन्तनुते निगीर्णं काचिदस्तव्यस्तता।

हन्त पुनरानीय मध्ये जीवनाब्धेः साम्प्रतम्,
मां निमज्जयतीह तीर्णं काचिदस्तव्यस्तता।

जीवनं मम कस्य किञ्चित् चिन्तनीयत्वं गतम्,
यस्य कस्यैवेह यद्यपि चिन्तनीयत्वं गतम्।

जीवनं मम तिष्ठतीह कियज्जगत्यां दुर्बलम्,
एवमिदमिह साम्प्रतं मे चिन्तनीयत्वं गतम्।

न व्यवस्थितमपि स्वधर्मे नैव कर्मण्यपि दृढम्,
एवमस्तित्वं मदीयं चिन्तनीयत्वं गतम्।

नैव यद् देवाय किञ्चिन्नापि पित्रे यदभवत्,
तस्य का चिन्तैव यत् खलु चिन्तनीयत्वं गतम्।

इत्थमुपहसनीयतायाः पात्रमस्मि जगत्यहम्,
जीवनं मम यस्य कस्य नु चिन्तनीयत्वं गतम्।

स्वजन इह दूरेऽपि तिष्ठन् नाम कुशलं भावयेत्,
न तु मदस्तित्वं निकटगं चिन्तनीयत्वं गतम्।

बाह्यदृष्ट्याऽस्तित्वमेतद् विफलमपि मे सर्वथा,
सार्थकं स्यात् तस्य यदि वा चिन्तनीयत्वं गतम्।

चिन्तनीयाः कारणं किं हन्त जाता वयमितः,
परमचिन्त्यं यच्च. तन्नश्चिन्तनीयत्वं गतम्।

नो 'जगन्नाथ' त्वमद्यावधि कथं विरमस्यहो,
नैव किं स्वं पश्यसि त्वं चिन्तनीयत्वं गतम्!

निश्चयः केन भवेत् तेन न किञ्चित् कथितम्,
इङ्गितेनाप्यथवा तेन न किञ्चित् कथितम्।
कैर्न कैर्हन्त जनैस्तत्र न किं किं कथितम्,
मीलितेनैव स्थितं तेन न किञ्चित् कथितम्।
यस्य वक्तव्यमितः श्रोतुमहं तत्र गतः,
उक्तमन्यैस्तु, परं तेन न किञ्चित् कथितम्।
तत्परः स्वं स्थित आसं सुतरामर्पयितुम्,
हन्त दुर्भाग्यमिदं तेन न किञ्चित् कथितम्।
यद्यपि प्रश्न इहाभून्नहि तेनोत्तरितः,
उत्तरं लब्धमहो तेन न किञ्चित् कथितम्।
सन्दिहानैः कियदस्माभिरवाप्तं कष्टम्,
हन्त मिलितेन ततस्तेन न किञ्चित् कथितम्।
वाग्विलसितं स्मितमतिरिच्य न किञ्चित् तस्य,
चेष्टितं तेन न तत् तेन न किञ्चित् कथितम्।
तेन भाव्यं कथमेवं मयि करुणार्द्रेण,
साम्प्रतं मां प्रति यत् तेन न किञ्चित् कथितम्।
यच्च भवितव्यमहो भाव्यमवश्यं तेन,
धैर्यबन्धार्थमहो तेन न किञ्चित् कथितम्।
अत्र व्यवहारवशात् कोऽपि प्रकटयेद् भावम्,
हन्त व्यवहारधिया तेन न किञ्चित् कथितम्।
किं 'जगन्नाथ' मुखरतेह तव स्यादुचिता,
साम्प्रतं त्वां प्रति यत् तेन न किञ्चित् कथितम्।

हन्त विपरीतं समन्तात् सुस्थितं किमु जायताम्,
चञ्चले नु तदीयचेतसि मद्गतं किमु जायताम् ।

नास्ति नास्त्येवेह कापि गतिर्जगत्यां मादृशाम्,
तस्य मां प्रति सम्प्रति क्षणमिङ्गितं किमु जायताम् ।

यस्य लाभायेदमद्यावधि मयोढं जीवनम्,
तत्तदीयं सुलभमधुना सुस्मितं किमु जायताम् ।

को नु शक्नोतीदमवरोद्धुं समन्तादात्मना,
एवमपि चित्तं मदीयं तद्गतं किमु जायताम् ।

लक्ष्यते तत् सर्वथा नेदृक्तया नेयत्तया,
किञ्चिदपि तद्रूपमिह परिभाषितं किमु जायताम् ।

क्षणमपि स्थैर्यं न यदुपैतीह किञ्चित् तादृशम्,
मन्मनः सुतरामिदानीं तन्मतं किमु जायताम् ।

न स्वभावे नापि व्यवहारे समत्वं ह्यावयोः,
तन्मतेन किमप्यभिन्नं मन्मतं किमु जायताम् ।

यस्य चेत् सर्वं मदीयं किन्नु तस्मै दीयताम्,
एतदादानप्रदानं सङ्गतं किमु जायताम् ।

सर्वथा मूकेन भाव्यं तत्सभाया विधिरयम्,
आवयोर्व्यवहार एवं सन्ततं किमु जायताम् ।

तज्'जगन्नाथे'ह दूरे तिष्ठ स्वयमेवाधुना,
त्वादृशानां तादृशैः सह संस्थितं किमु जायताम् ।

धीशालिना गतस्य कृते केन दूयते,
लब्धं न यच्च तस्य कृते केन दूयते ।

तेनेह नैव सम्प्रति परिशीलितं क्षणम्,
कुत्रापि पीडितस्य कृते केन दूयते ।

क्षतविक्षतस्य लाभधिया मार्गकण्टकैः,
व्यर्थं प्रधावितस्य कृते केन दूयते ।

स्वार्थस्य सर्वतोऽपि जरीजृम्भते स्थितिः,
क्षणमन्यथेह कस्य कृते केन दूयते ।

पश्यन्ति सर्व एव यदप्यार्द्रया दृशा,
तदपीह नाटकस्य कृते केन दूयते ।

गोष्ठ्यो भवन्ति बुद्धिमतां संस्थिते मयि,
इह जीवितस्य कस्य कृते केन दूयते ।

त्वां नैव वच्मि सर्वत एषैव रे स्थितिः,
जानामि मादृशस्य कृते केन दूयते ।

तं वृक्षमाश्रयन्ति फलं लभ्यते यतः,
पथि सन्निपातितस्य कृते केन दूयते ।

जयशलिनेऽर्पयन्ति स्रजः सर्वतो जनाः,
युद्धे पराजितस्य कृते केन दूयते ।

परिणाममस्य नैव 'जगन्नाथ' वेत्सि किम्,
प्रेम्णीह यापितस्य कृते केन दूयते ।

तस्यैव नाम सम्प्रति गेयं शनैः शनैः,
पश्येन्न कोऽपि त्वामिह पेयं शनैः शनैः ।

सन्त्येव दुर्जना इह जानन्ति दूरतः,
आवृत्य स्वं कुतश्चन स्थेयं शनैः शनैः ।

दीना जना अपीह भवन्त्येव तत्प्रियाः,
दैन्यं स्वकीयमेव न हेयं शनैः शनैः ।

उच्चैर्य एव भाषत इत्थं स श्रूयते,
नियमो न कश्चिदेष हि ध्येयं शनैः शनैः ।

कुर्युर्न कण्टका इह रे तेऽङ्गुलीः क्षताः,
उद्यानप्रसूनं बत चेयं शनैः शनैः ।

त्वज्जीवने कदापि वसन्तागमो भवेत्,
विरसं त्वया दिनं खलु नेयं शनैः शनैः ।

जानातु नैव बाह्यजनस्त्वत्प्रदानमाः !
तस्मै स्वमेवमेव हि देयं शनैः शनैः ।

वहवो जिता जना इह लोके त्वया मुदा,
अन्ते स्वमेव किञ्चन जेयं शनैः शनैः ।

सिध्येज्जनस्य चित्तगतं नैव सर्वथा,
सविधे हि यस्य कस्य न नेयं शनैः शनैः ।

कवितेह 'जगन्नाथ' त्वयाऽसावलङ्कृता,
त्वामप्यलङ्करोतु सदेयं शनैः शनैः ।

यदपीह मयि मनो हि स्थितं वर्ततेतराम्,
तदपीह कञ्चिदेव श्रितं वर्ततेतराम्।

स्यादीप्सितं कथं मम तद्दानपूरितम्,
सर्वं कृते तु तस्य मितं वर्ततेतराम्।

बध्नाति मां प्रयान्तमितो यत्प्रतिक्षणम्,
अवरोधकं तदेव स्थितं वर्ततेतराम्।

व्याकीर्णतां प्रयाति न हृदयं हि मामकम्,
केनापि सद्दयेन धृतं वर्ततेतराम्।

प्रीत्या कथञ्चिदस्तु रुषा वाऽपि सर्वथा,
हृदयं ममेह तेन हृतं वर्ततेतराम्।

यस्मिन्न जीवनस्य क्वचिल्लक्ष्यते स्थितिः,
अस्तित्वमीदृशं नु मृतं वर्ततेतराम्।

आजीवनं भुवीह भवेदेष पीडितः,
इत्थं क्वचिन्नु तस्य कृतं वर्ततेतराम्।

आशासुबीजमङ्कुरभावं कथं व्रजेत्,
हृत्क्षेत्रकं तुषारसृतं वर्ततेतराम्।

गतमेतदस्तु केन प्रयत्नेन सत्फलम्,
न विलम्बितं न वाऽपि द्रुतं वर्ततेतराम्।

सुप्तोऽसि 'जगन्नाथ' न जानासि तावकम्,
चौरेण सर्वमेव हृतं वर्ततेतराम्।

नैव ये केऽपि जनाः सेव्यन्ते,
केचिदन्ये हि जनाः सेव्यन्ते ।

सत्कुटुम्बं ननु विश्वं येषाम्,
तादृशा एव जनाः सेव्यन्ते ।

रामवद् यैरिह किञ्चिच्चलितम्,
परिमितास्ते हि जनाः सेव्यन्ते ।

रूपपक्षे ननु धावन्त्यन्ये,
हृदि सदार्द्रा हि जनाः सेव्यन्ते ।

अर्पितं यैरिह न स्वं किञ्चित्,
ते जनैर्नैव जनाः सेव्यन्ते ।

जायते तत्र तु हृदये शल्यम्,
यत्र सेव्या न जनाः सेव्यन्ते ।

जन्मनस्तस्य हि रे धन्यत्वम्,
येन सेव्या हि जनाः सेव्यन्ते ।

सन्ति सेव्या इह बहवो लोके,
सेवका एव जनाः सेव्यन्ते ।

त्वां 'जगन्नाथ' साधु पृच्छामि,
किं त्वया सेव्यजनाः सेव्यन्ते ।

गोप्यमेतद् यदस्ति मे दैन्यम्,
वाच्यमेतन्न किञ्च मे दैन्यम् ।

मन्यते कस्यचित् प्रसादोऽयम्,
यच्च मय्येवमस्ति मे दैन्यम् ।

जीवनस्यैष रे महान् लाभः,
कोऽपि जागर्ति नाम, मे दैन्यम् ।

कस्यचिद् वा बलं भवेत् सैन्यम्,
मद्बलं केवलं तु मे दैन्यम् ।

यन्मयाऽऽप्तं त्वदस्ति याचितकम्,
त्वत्कृपायाः फलं हि मे दैन्यम् ।

यच्च विवशीचकार मां गन्तुम्,
त्वां प्रतीत्थं तदेव मे दैन्यम् ।

प्रस्तरो मे द्रवेदहम्भावः,
येन, तत्साध्यमेव मे दैन्यम् ।

तं कठोरं यदार्द्रयेत् किञ्चित्,
अश्रुकलितं तदेव मे दैन्यम् ।

गोपनीयं मया मम प्राणैः,
सम्पदे तद् यदस्ति मे दैन्यम् ।

त्वां 'जगन्नाथ'मभ्यसूयेऽहम्,
देहि किञ्चित् स्वमेव मे दैन्यम् ।

भाषितं यद् वा मदीयं तन्नु सोढव्यं त्वया,
मामकं यद् वा विचलितं तन्नु सोढव्यं त्वया ।

नेत्रयोर्जाने न भाषां तावताऽहं वञ्चितः,
मधु करान्मे यद् विगलितं तन्नु सोढव्यं त्वया ।

सान्त्वनावाचं त्वदीयां शृण्वताऽपि मया तदा,
यच्च दग्धेनेह रुदितं तन्नु सोढव्यं त्वया ।

हन्त मे ह्यपराधप्रकृतेर्नापराधाः कति कति,
अयि क्षमाप्रकृते ! समग्रं तन्नु सोढव्यं त्वया ।

यस्य मे स्खलितानि गमने भाषितानि पदे पदे,
तस्य कृपया कृत्यजातं तन्नु सोढव्यं त्वया ।

मत्समर्पणमेतदास्ते नाटकं नहि सर्वथा,
यदिह स्याद् यदि कृत्रिमत्वं तन्नु सोढव्यं त्वया ।

भ्रामयत्येतत् त्वदीयं किञ्चिदौदासीन्यकम्,
यच्च मत्पक्षे विकलितं तन्नु सोढव्यं त्वया ।

त्वद्दृशोराकुञ्चितत्वं यदभवत् तत्कारणम्,
मम हि यद् विनिमीलितत्वं तन्नु सोढव्यं त्वया ।

नैव भामिन्या विलसितं तत् तवेह विलोकितम्,
मादृशाञ्च यदक्षमत्वं तन्नु सोढव्यं त्वया ।

नैव कस्यचनापि हानिस्त्वां 'जगन्नाथ' विना,
नैव पृष्टस्त्वं यदेभिस्तन्नु सोढव्यं त्वया ।

मदीयं पीडितं हृदयं बलान्नीतं त्वयेदानीम्,
मदीयं तद्धि सर्वस्वं बलान्नीतं त्वयेदानीम्।

कुतो वा वर्तते न्यायो न कश्चिद् वर्तते साक्षी,
विधेयं किम्, समग्रं मे बलान्नीतं त्वयेदानीम्।

मदीयं मधु मदीयं पानपात्रं तत्क्रमेणैव,
बलात्पीतं त्वयेदानीं बलान्नीतं त्वयेदानीम्।

मया यद् देयमासीत्तुभ्यमुपहारस्वरूपेण,
महद् दुःखं हि तद्धृदयं बलान्नीतं त्वयेदानीम्।

नहीत्थं विद्यते मन्ये जगत्यां किञ्चिदास्थेयम्,
अहो स्वजनेन मे सर्वं बलान्नीतं त्वयेदानीम्।

फलं सद्भावनायाः किं भवत्यत्रैव पश्यन्तु,
मया स्वयमर्पितं सकलं बलान्नीतं त्वयेदानीम्।

न चौरस्येह वृत्तं यो हरत्यर्थं तमस्येव,
स्फुटं ते हन्त दस्युत्वम्, बलान्नीतं त्वयेदानीम्।

कियत्सत्यं च कियदनृतं कथं वा ज्ञायतां भिन्नैः,
जलं त्यक्त्वा मम क्षीरं बलान्नीतं त्वयेदानीम्।

समक्षं कस्य वक्तव्यं मिलन्त्युपदेशकाः सर्वे,
न विश्वसितीह मे लोको बलान्नीतं त्वयेदानीम्।

रहस्यं को 'जगन्नाथस्य' त्वामपहाय वेत्तीह,
तदीयं यच्च यावत् तद् बलान्नीतं त्वयेदानीम्।

नैव मिलितो हन्त स जनो यस्य विद्धं नान्तरम्,
कश्चिदपि भवितेह सुभगो यस्य विद्धं नान्तरम् ।

स्नेह एक: सूत्रधार: किन्नु नाट्यस्यास्य रे,
तच्च पात्रं नैव दृष्टं यस्य विद्धं नान्तरम् ।

अन्यथाऽपि भवन्त्यहो रुदितानि मन्ये प्राणिनाम्,
तस्य न स्नेहोऽस्ति सिद्धो यस्य विद्धं नान्तरम् ।

सत्पथोऽयं दुष्पथोऽयं को नु निर्णीयादिदम्,
प्रणयमार्गे नहि स दृष्टो यस्य विद्धं नान्तरम् ।

किमयमपि तस्यैव पक्षे सिध्यतीह पराजय:,
प्रस्थितस्यापीह पथि वा यस्य विद्धं नान्तरम् ।

हन्त नैवाज्ञापित: स कदाचिदावासाय रे,
यस्य नीडं नैव भग्नं यस्य विद्धं नान्तरम् ।

सन्ति साफल्यप्रकारा बहव एवेहापि चेत्,
नैव सिद्धं तस्य किञ्चिद् यस्य विद्धं नान्तरम् ।

धन्यतेह न तस्य सिध्येद् वन्द्यतेह न तस्य रे,
तच्च दयनीयं हि मन्ये यस्य विद्धं नान्तरम् ।

कस्यचिन्मन्ये कटाक्षा: सन्ति बाणा: सर्वथा,
तस्य विषये किन्नु वाच्यं यस्य विद्धं नान्तरम् ।

किं 'जगन्नाथ' त्वमेवं साम्प्रतं नु विकत्थसे,
दीनमेव त्वां नु मन्ये यस्य विद्धं नान्तरम् ।

कोऽपीह न त्वदीय इतो मौनमास्यताम्,
भविता त्वया न कोऽपि जितो मौनमास्यताम् ।

यस्मै तदिङ्गितं स इतो भाषते जनः,
उक्तोऽसि न त्वमेवमितो मौनमास्यताम् ।

प्रतिकूलतां गते बत तस्मिन् न ते शुभम्,
नो यासि चेद् भवेह स्थितो मौनमास्यताम् ।

दुःखस्य किन्न वेत्सि सखे दुर्निवारताम्,
रोदिस्यतीव व्यर्थमितो मौनमास्यताम् ।

पतसीह नैव, रोदिसि व्यर्थं स्थिरो भव,
त्वमसीह केनचिच्च धृतो मौनमास्यताम् ।

आनीतवान् य एव स चिन्तां विधास्यति,
एवं हि चिन्तयाऽलमितो मौनमास्यताम् ।

कोलाहलेन कस्य हि सिध्येदभीप्सितम्,
व्यर्थं हि तृष्णयाऽसि हृतो मौनमास्यताम् ।

जायेत परिचयो नहि सामीप्यलाभतः,
व्यवहार एष तेऽस्तु मितो मौनमास्यताम् ।

मौनस्य भाषितानि भवन्त्येव सर्वथा,
स व्याहरत्यदृष्ट इतो मौनमास्यताम् ।

त्वज्जीवनाय हन्त 'जगन्नाथ' का गतिः,
भवितेह सर्व एव मृतो मौनमास्यताम् ।

मादृशामस्तित्वमपि न त्वादृशैरङ्गीकृतम्,
त्वादृशैरिह यद् यदुक्तं मादृशैरङ्गीकृतम् ।

अस्तु किरणानां प्रवाहो वाऽस्तु महसां संहतिः,
यद् यदाप्तं त्वन्निवासान्मादृशैरङ्गीकृतम् ।

तत्तदेवास्माभिराप्तं सर्वथा दूरीकृतैः,
नैव यद् यदिदं त्वयैतैः सत्कृतैरङ्गीकृतम् ।

तथ्यमपि त्वां प्रति न किञ्चित् कटु मयेदं भाषितम्,
तदपि रुष्टेणेह मद्वचनं त्वया नाङ्गीकृतम् ।

त्वं वदेः कं यासि शरणं स्वं पवित्रयितुं यदि,
गङ्गया नाङ्गीकृतं यदि यमुनया नाङ्गीकृतम् ।

यत् त्वदीयमितीव कृत्वा बहुभिरत्र विचारितम्,
शंसितैर्नाङ्गीकृतं तन्निन्दितैरङ्गीकृतम् ।

नैव मे व्यवसाय एष त्वादृशानां संस्तवः,
यत् त्वया नाङ्गीकृतं तन्नहि मयाऽप्यङ्गीकृतम् ।

आतपोऽप्यङ्गीकृतश्छायैव मात्रं नहि मता,
यत्तवेष्टं दीयतां मे, प्रथममेवाङ्गीकृतम् ।

न त्वदुद्यानस्य कुसुमानां हि पात्रं मादृशाः,
दीयतां रे कण्टकोऽपि च तदपि मे ह्यङ्गीकृतम् ।

मां 'जगन्नाथं' न यद्यपि स्वीय इति जानाति सः,
तदपि वचनं तस्य सम्प्रति सर्वमप्यङ्गीकृतम् ।

हृदन्तस्त्वयेदं समाश्रीयतां मे,
कदाचित् स्वहृदयं समानीयतां मे ।

सुधायै न मे कश्चिदेष प्रयासः,
स्वकीयोऽधरोऽयं समानीयतां मे ।

भवद्दर्शनाकाङ्क्षि चित्तं मदीयम्,
त्वया ह्येष प्रश्नः समाधीयतां मे ।

असत्यं नहीदं त्वदग्रे भणामि,
त्वयाऽहो वचस्येवमास्थीयतां मे ।

तदन्योन्यमादाय मध्वेवमेवम्,
मया पीयतां ते त्वया पीयतां मे ।

कदाचित्तु चेतःसरःस्नेहसिक्तम्,
क्षणं गीतमेकं त्वया गीयतां मे ।

रुषा वाऽपि कोपेन सम्प्रत्यभिन्ने !
हृदुपहार एष त्वया दीयतां मे ।

आकर्षणं करोति न रूपं मलीमसम्,
चित्तं ननु बध्नाति न रूपं मलीमसम् ।

रूपे तु चित्तमेतितरामेकरूपताम्,
ऐकाग्र्यमादधाति न रूपं मलीमसम् ।

तस्यैव रूपमेकमहो रूपमस्त्यदः,
अन्यच्च किञ्चिदस्ति न रूपं मलीमसम् ।

रूपं जडोऽपि वारिधिरुद्ग्रीव ईक्षते,
प्रामोद्यमादधाति न रूपं मलीमसम् ।

सर्वस्य रूपमेव समाधानमस्ति रे,
किञ्चित् समादधाति न रूपं मलीमसम् ।

रूपं हि सर्वमेव करोतीदमात्मसात्,
किञ्चिद् बत गृह्णाति न रूपं मलीमसम् ।

रूपं सुवर्णमेव न रूप्यं सुवर्णकम्,
किञ्चिच्च सन्दधाति न रूपं मलीमसम् ।

रूपेण 'जगन्नाथ' नहि स्वेन शोभसे,
शोभां तव पुष्णाति न रूपं मलीमसम् ।

—१८—

जीव्यतामिह् केन विधिना, नैव कश्चित् स्निह्यति,
परजनस्य तु का कथा स्वो नैव कश्चित् स्निह्यति।

आत्मनो भाग्यस्य रुदितव्यं हि तावद् वा कियत्,
कस्य कस्य हि भाषितव्यं नैव कश्चित् स्निह्यति।
यस्य श्रोतव्यं न श्रोतुं सम्प्रति स उत्कण्ठते,
कस्य विषये किन्तु वाच्यं नैव कश्चित् स्निह्यति।
यद्यपीदं धैर्यमलमालम्वनं भविता मम,
तत्तु विधिना केन लभ्यं नैव कश्चित् स्निह्यति।
दूरमस्मिन् पथि मया गन्तव्यमेते कण्टकाः,
यूयमेवालम्वनं मे नैव कश्चित् स्निह्यति।
कस्य भाग्ये किं विधातुश्चेष्टितं जानाति कः,
किन्तु मे प्रतिभाति सर्वं नैव कश्चित् स्निह्यति।
अस्य कटुसम्भाषितस्य कृते क्षमध्वं मामकाः,
जीवनं किमु जीवनं मे नैव कश्चित् स्निह्यति।
निश्चये विहिते किमेवमसम्भवं जगतीतले,
निश्चितं तदसम्भवं मे नैव कश्चित् स्निह्यति।
स्थाणुरस्मि न गृध्रकोऽप्यायाति मयि स्थातुं क्षणम्,
अग्निसादिह कुरुत मां वत नैव कश्चित् स्निह्यति।
स्याज्जनस्य सहानुभूतिस्त्वयि 'जगन्नाथे' तु का,
स्निह्यसि क्वचिदपि, वदसि यन्नैव किश्चत स्निह्यति।

किं किं न तस्य भाषितं शिरसा मया धृतम्,
तदसाम्प्रतं वा साम्प्रतं शिरसा मया धृतम्।

सम्मर्दितं मदीयकं येनोदितं पदा,
तस्यैव हन्त भाषितं शिरसा मया धृतम्।
पतते त्वया न मेऽर्पितं हस्तावलम्बनम्,
प्रतिकूलमपि तवेङ्गितं शिरसा मया धृतम्।
उन्मीलितं मदीयकं नाभूत् तव प्रियम्,
सुतरां त्वदीयमीलितं शिरसा मया धृतम्।
कालेन तस्य सत्फलं किञ्चिद् भवेदिह,
यद् यत् तदीयचेष्टितं शिरसा मया धृतम्।
सुविशाल एष प्रस्तरो मम नाम जीवितम्,
पुष्पस्रगित्युपाहृतं शिरसा मया धृतम्।
दुःखं तदस्ति केवलं हृदि जानता मया,
सुखमेतदिति तदीरितं शिरसा मया धृतम्।
अमृतं पिबेति मेऽर्पितं विषमेव तेन यत्,
अविचार्य तच्च साम्प्रतं शिरसा मया धृतम्।
दौर्भाग्यमेतदस्ति वा सौभाग्यमस्ति वा,
दृक्सङ्गतं तदीयकं शिरसा मया धृतम्।
मित्रस्य 'जगन्नाथ' क्षणं भाषितं शृणु,
मा याहि पश्य किं न किं शिरसा मया धृतम्।

सन्धाय गीयतां किं मम गीतमेव दग्धम्,
इह किं निवेद्यतां रे मम गीतमेव दग्धम् ।

एको ममेदमासीन्मम जीवनाभ्युपायः,
मम भाग्यविप्लवाद् वा तद् गीतमेव दग्धम् ।

अस्तित्वमस्मदीयं यदुपाश्रितं तदेतत्,
अहमस्मि शून्यशून्यो मम गीतमेव दग्धम् ।

रुदितं च दग्धमेतत्, हसितं च दग्धमेतत्,
सकलं हि दग्धमेवं मम गीतमेव दग्धम् ।

परिवार्य साम्प्रतं मां कथमेव कोऽपि तिष्ठेत्,
शुश्रूषितं तदीयं मम गीतमेव दग्धम् ।

विषरूपतां गतेऽस्मिन्नस्तित्वके मदीये,
अमृतं यदेकमासीत् तद् गीतमेव दग्धम् ।

प्रणयस्य किन्तु वाच्यं तमिहाग्निमेव मन्ये,
दग्धे सतीव हृदये मम गीतमेव दग्धम् ।

मम सत्यमिह नु दग्धं मम सुन्दरञ्च दग्धम्,
मम शिवमपीह दग्धं मम गीतमेव दग्धम् ।

भङ्गीभणितकानां क इवाश्रयो ममास्तु,
यदिदं कदाचिदेतन्मम गीतमेव दग्धम् ।

ननु नाममात्रमेवं भवसीह 'जगन्नाथः',
त्वमनाथ एव जातस्तव गीतमेव दग्धम् ।

निसर्गस्यैव तद् रूपं तदीयं मन्यतामित्थम्,
इदं परिवर्तते, परिवर्तनीयं मन्यतामित्थम् ।

परित्यज्येह सिकताराशिमेषा यास्यति स्वैरम्,
उपेता काकपेयात्वं नदीयं मन्यतामित्थम् ।

क एव स्यात् परैः साकं मदीयः कोऽपि सम्बन्धः,
स्वकीयोऽपीह कश्चिन्मां स्वकीयं मन्यतामित्थम् ।

स्थले कोलाहलैर्भरिते मया रे यापनीयं किम्,
मदस्तित्वं प्रगर्ते पातनीयं मन्यतामित्थम् ।

समाचारस्य लाभादेव को लाभो मया लब्धः,
ततः पत्रोत्तरं नापेक्षणीयं मन्यतामित्थम् ।

तदीयं चापलं तस्यैव पक्षे शोभते सम्यक्,
मया तत्सर्वमथवा नाटकीयं मन्यतामित्थम् ।

तदुद्याने लसत्कुसुमे सहस्रं कण्टकाः सन्ति,
तथापि स्वीयनीडं स्थापनीयं मन्यतामित्थम् ।

कदाचिद् व्यवहरन्त्यतिमात्रकठिनं हन्त सुकुमाराः,
तदपि पक्षे स्वकीये धारणीयं मन्यतामित्थम् ।

इतः संलक्षिता भवता किमपि वा कस्यचित्तुष्टिः,
न रे स्वस्यापि दानैः पूरणीयं मन्यतामित्थम् ।

'जगन्नाथाय' यद् दत्तं कृतज्ञोऽसौ कृते तस्य,
वराकस्त्वत्कृते किमिवार्पणीयं मन्यतामित्थम् ।

किं परस्मै स्वव्यथा विनिवेद्यताम्,
दुःखमिलिता किं कथा विनिवेद्यताम् ।

मामको भागः परेभ्यो मत्पुरः,
कथमिदानीमन्यथा विनिवेद्यताम् ।

सन्त्यमी मन्येऽपराधा मामकाः,
तत्त्वतः कस्मै तथा विनिवेद्यताम् ।

केऽपि शृण्वन्तोऽपि नैवं शृण्वते,
आस्यतां मौनं तथा विनिवेद्यताम् ।

सिन्धवस्तेभ्यस्तु ये न पिपासवः,
किमु पिपासुभ्यो वृथा विनिवेद्यताम् ।

मत्पुरः प्रतिपादनीयं तत्तथा,
तत्पुरो ननु यद् यथा विनिवेद्यताम् ।

हन्त नैराश्यं मदीयं वर्धते,
काऽपि सुस्निग्धा कथा विनिवेद्यताम् ।

को नु हासो वा किमानन्दोऽथवा,
तत्तथा वा यद् यथा विनिवेद्यताम् ।

प्रतिफलेदथवा न किञ्चित् प्रतिफलेत्,
नन्विदानीं स्वव्यथा विनिवेद्यताम् ।

सव्यथानां किं 'जगन्नाथ' त्वया,
पुरत एषा स्वव्यथा विनिवेद्यताम् ।

उद्यानमधन्यं न समायाति वसन्तः,
आगत्य न तिष्ठेत् क्षणमायाति वसन्तः ।

पत्राणि सुजीर्णानि द्रुतं हन्त पतत रे,
उद्यानमस्मदीयमुपायाति वसन्तः ।

कथया किमु सिध्येद्, बत तस्येह कथितया,
इह नैव च नैवेह समायाति वसन्तः ।

आरोग्यमिह स्यादथवा व्यधिरुदेतु,
जाने किमु भवितेह समायाति वसन्तः ।

तस्यैव हि धन्यत्वमलङ्कारभरोऽयम्,
यस्येह गृहं सादरमायाति वसन्तः ।

जाड्यस्य कथङ्कारमिदानीमपि वासः,
उत्तिष्ठ कुरु स्वागतमायाति वसन्तः ।

पीतं परिधानं स्फुरदाधृत्य समन्तात्,
पश्येह तव द्वारमुपायाति वसन्तः ।

निष्प्राण इतः प्राणिति जागर्ति च सुप्तः,
अथ चेत् क्षणमेकं स समायाति वसन्तः ।

सुरभेरथ कुसुमस्य कथानां क्षण एषः,
सम्प्रत्यतिथीभूय समायाति वसन्तः ।

भाग्यं न 'जगन्नाथ' तव स्यादुपकर्तृ,
कथया ह्यलमनयेह यदायाति वसन्तः ।

त्वदग्रे निष्फलानां भूस्थितानां कीदृशी चर्चा,
तव द्वारादिदानीं प्रस्थितानां कीदृशी चर्चा।

जगत्यां कस्य कस्य स्वव्यथा विनिवेद्यतामधुना,
त्वदप्राप्त्या समन्तात् पीडितानां कीदृशी चर्चा।

कथारम्भस्तु दूरे हन्त कुसुमानां सुगन्धीनाम्,
लतानां वात्यया भूलुण्ठितानां कीदृशी चर्चा।

निवार्यन्ते य इत्थं त्वद्गृहस्य द्वारि प्रविशन्तः,
सुदूरे हन्त तेषां संस्थितानां कीदृशी चर्चा।

तवैते द्वारपाला मामके रुदितेऽपि शङ्कन्ते,
त्वदग्रे शङ्कनीयानां स्थितानां कीदृशी चर्चा।

त्वदीया अपि यतो नैवं लभन्ते त्वद्धृदि स्थानम्,
परेषामिङ्गितैः संवर्जितानां कीदृशी चर्चा।

न नैराश्यं न शैथिल्यं न काचिद् व्यग्रताऽप्यधिका,
त्वदीयैर्व्यर्थमित्थं दूषितानां कीदृशी चर्चा।

त्वमेवैकं प्रमाणं स्वीकृतेरस्वीकृतेरपि वा,
इतो ह्यस्वीकृतानां स्वीकृतानां कीदृशी चर्चा।

विहाय त्वां न कोऽप्यवशिष्यते लोके य ईक्षेत,
त्वयाऽस्माकं समन्ताद् वीक्षितानां कीदृशी चर्चा।

'जगन्नाथस्य' किञ्चित् सार्थकत्वं केन विधिना स्यात्,
त्वदग्रे तादृशां मूकीकृतानां कीदृशी चर्चा।

आपद्गतं हि के न के सम्बोधयन्ति माम्,
विहसन्ति ते पश्चान्नु ये सम्बोधयन्ति माम् ।

चक्रारपंक्तिवद् यतः परिवर्तते जगत्,
सुखमाप्स्यसीति हन्त ते सम्बोधयन्ति माम् ।

येषां प्रबोधनाय मया स्वं समर्पितम्,
मय्यार्द्रतां गता हि ते सम्बोधयन्ति माम् ।

गन्तव्यमेव यैर्न वा परिशीलितं क्षणम्,
मिलिताः यतः कुतोऽपि ते सम्बोधयन्ति माम् ।

प्रेमाध्वनीह सञ्चरन् म्रियसे सुनिश्चितम्,
हितकाम्यया जना इमे सम्बोधयन्ति माम् ।

विरम क्षणं सखे ततो विरम क्षणं सखे,
स्वजनाः किमेव ते नु ये सम्बोधयन्ति माम् ।

पूर्वं हसन्त एव ये ह्यासन् सदा मयि,
अधुना रुदन्त एव ते सम्बोधयन्ति माम् ।

उच्चैःस्वरेण साम्प्रतं परिवर्तनाय मे,
दूरे स्थिता इमे नु के सम्बोधयन्ति माम् ।

यैरेव सुस्मितैरिह सम्बोधितोऽभवम्,
कटुभाषितैः परं नु ते सम्बोधयन्ति माम् ।

सम्बोधयेत्क एव 'जगन्नाथ' मादरात्,
स्निग्धा इमे न सन्ति ये सम्बोधयन्ति माम् ।

—१९—

त्वया वर्धितेयं मदीया पिपासा,
कथं क्षीयतां रे मदीया पिपासा।

सुधायै तथा काङ्क्षितं नैव, नैव,
इयं वर्धतां चेन्मदीया पिपासा।

क्व कश्चित् कृपाया महासागरस्त्वम्,
क्व जातेयमित्थं मदीया पिपासा।

पिपासैव यस्यास्ति नियतिः स कश्चित्,
मरुः सोऽहमेषा मदीया पिपासा।

घनश्याम ! वर्ष क्वचिन्मय्यपि त्वम्,
प्रशान्ति समीयान्मदीया पिपासा।

कणाः केऽपि पयसस्त्वदभ्यर्थनीयाः,
न हन्यादियं मां मदीया पिपासा।

सुदूरे स्थितं त्वां बलादानयेद् वा,
समीपं कदाचिन्मदीया पिपासा।

न सा मन्यतां नाटकीयं विधानम्,
मदन्तर्गता या मदीया पिपासा।

शमं याति पानैरियं नैव हन्त,
पिपासैव भिन्ना मदीया पिपासा।

पिपासो'जगन्नाथ'नाम्नोऽस्ति भणितम्,
मदेषा न भिन्ना मदीया पिपासा।

अद्यापि तत् सुचिन्त्यते तस्याः शुचि स्मितम्,
अद्यापि तन्निपीयते तस्याः शुचि स्मितम् ।

अनुकूलतामभूद् गतं नहि यद्यपीह मे,
तदपीह नैव शङ्क्यते तस्याः शुचि स्मितम् ।

यस्मिन्नभूवमेष रे प्राणैः समर्पितः,
तन्नानुकूलमोक्ष्यते तस्याः शुचि स्मितम् ।

पुष्पं स्वभावतोऽपि मे यदभूच्च कण्टकः,
तद् दृक्पथेऽद्य नीयते तस्याः शुचि स्मितम् ।

जीर्णं पटं स्वजीवनं यावद् बिभर्म्यहम्,
तत् तावदेव चीयते तस्याः शुचि स्मितम् ।

विद्धं निरन्तरं नु यद् येनाभवच्च, तत्,
हृदयेन तेन गीयते तस्याः शुचि स्मितम् ।

यद् गुम्फितं क्षणेन मे नक्षत्रवत् तया,
चित्ताम्बरान्न क्षीयते तस्याः शुचि स्मितम् ।

संलग्नमस्ति हृद्यहो यद् बाणवन्मम,
तत् किञ्चिदेव धीयते तस्याः शुचि स्मितम् ।

सौभाग्यमस्ति यस्य जनस्येह जन्मनि,
तेनैव सन्निधीयते तस्याः शुचि स्मितम् ।

नैवेह 'जगन्नाथ' रे त्वं भाग्यभागसि,
किं वा त्वया विगीयते तस्याः शुचि स्मितम् ।

तत्र तत्र न हन्त कैश्चित् तावकीनैः शङ्कितम्,
यद् यदस्माकं नु तस्मिन् मामकीनैः शङ्कितम् ।

नैव दुःखं यच्चत्र किञ्चित् शङ्कितं गुणशालिभिः,
तन्महत् कष्टं हि मे यद् गुणविहीनैः शङ्कितम् ।
वर्त्म प्राचीनैर्यदेवं निःस्पृहैरङ्गीकृतम्,
तत्र चलितुमशक्नुवद्भिस्तन्नवीनैः शङ्कितम् ।
किञ्चिदेव स्वैर्गतैर्भविता जगत् परिवर्तितम्,
तद् वृथैवमशङ्कनीये बुद्धिहीनैः शङ्कितम् ।
ग्रीष्मकाले पतति यास्यत्यम्भ एतच्छुष्कताम्,
नैव विहगैः शङ्कितं बत किन्तु मीनैः शङ्कितम् ।
त्वय्युपस्थित एव यत्तद् भणितमन्यैः कतिपयैः,
त्वत्सभायां मूकमूकैस्त्वय्यधीनैः शङ्कितम् ।
द्वारि ते वलवत्तरैर्वलवत्प्रवेशो लम्भितः,
यादृशैर्भविता प्रवेशो नेति क्षीणैः शङ्कितम् ।
अर्पयन्त्यः स्वं हि किञ्चिन्नैव नद्यः शङ्किताः,
ताः समीपे प्रेक्ष्य हृदि दीनैर्नदीनैः शङ्कितम् ।
यास्यतीह समग्रमस्तित्वं मदीयं लीनताम्,
इत्थमिह किञ्चिन्न मुदितैरात्मलीनैः शङ्कितम् ।
हे 'जगन्नाथ' त्वमस्मिन् भव न किञ्चिच्छङ्कितः,
त्वयि न क्षीणैः शङ्कितं न च हन्त हीनैः शङ्कितम् ।

ममेव कस्यचिदन्तर्न पीडितं भूयात्,
न भाग्यमेव च कस्यापि मीलितं भूयात् ।

य एव कारणं यातो मदीयपीडायाः,
जनस्य तस्य न फलितं समीहितं भूयात् ।

निवारय क्षणमवगुण्ठनं निजाद् वदनात्,
सुलक्ष्यमावयोरन्योन्यमीक्षितं भूयात् ।

न शिक्षयन्ति जनास्त्वामिमे यथा प्रणये,
परस्य कस्यचिदेवं न क्रीडितं भूयात् ।

तमानयाशु जनं यस्य रे मदातिशयः,
ममेव प्रेम नु तस्यापि शीलितं भूयात् ।

न मौनमेवमतीव त्वमाश्रयेः प्रणये,
तथैव किञ्चन प्रकटं त्वदीरितं भूयात् ।

मम व्यथामिह पृच्छन्त्यमी, ततो हृदये,
त्वदक्षि कस्यचिदेकस्य कीलितं भूयात् ।

त्वया कदाचन प्रणयस्य रे प्रसङ्गेन,
न हन्त कस्यचिद् हृदयं परीक्षितं भूयात् ।

वरं स्वमृत्युरहो नैव रे प्रतीक्षेयम्,
ममेव तस्य कदाचित् प्रतीक्षितं भूयात् ।

व्यथाकथां न 'जगन्नाथ' श्रावयेह निजाम्,
यदक्षि सम्प्रति तस्या निमीलितं भूयात् ।

मया लब्धव्यमुपलब्धं नु, हालायै नमस्तस्यै,
ततो रे याम्यहं त्वन्मद्यशालायै नमस्तस्यै।

निबद्धेनैव यस्यां यापिता ह्येते मया दिवसाः,
मया स्वातन्त्र्यमुपलब्धं नु, कारायै नमस्तस्यै।

इदानीं दिव्यगन्धस्य स्फुरत्तामनुभवाम्येषः,
स्फुरन्निजवर्णमात्रायै सु-मालायै नमस्तस्यै।

ममेयं क्षुद्रता नैवं तदङ्केऽपीह परिनष्टा,
महीयस्यै नमस्तस्यै विशालायै नमस्तस्यै।

प्रतीक्षायां कियत् स्थातव्यमुद्विग्नैरिहास्माभिः,
समारब्धं तथा नृत्यं न, राधायै नमस्तस्यै।

कियद् रे श्रूयतामेषा प्रभाता साम्प्रतं रजनी,
सुनिद्रा बाधते काचित्, सु-गाथायै नमस्तस्यै।

न यस्यां किञ्चिदस्माकं विलीनं क्लिष्टमस्तित्वम्,
त्वदीयस्यास्य स्नेहस्येह धारायै नमस्तस्यै।

वयं रूपेण यस्या दस्युना रे लुण्ठिताः सर्वे,
त्वदीयायै सुरूपायै हि मायायै नमस्तस्यै।

मदीयां भावनामीष्टे न या व्यञ्जयितुमिह किञ्चित्,
मदीया मौनिता सफला, स्वभाषायै नमस्तस्यै।

'जगन्नाथ' त्वमपि निर्याहि नास्मिन् किमपि सेत्स्यति ते,
प्रतीक्षा नैव ते फलिता सु-बाधायै नमस्तस्यै।

न तस्य काचिदपेक्षेति मन्यतामथवा,
वियोग एव सदा तस्य दह्यतामथवा ।

न यस्य नाम कदाचिच्च विस्मृतिं गच्छेत्,
इतीव तन्निजहृदयेन नह्यतामथवा ।

स्वयं स वेत्तु त्वदीयञ्च तदगतं प्रेम,
गिरा कदाचन मितया निवेद्यतामथवा ।

लभन्त एव न प्रणये पदं यदुपचाराः,
निसर्ग एव स तस्येति सह्यतामथवा ।

तदीयप्रेम्णि हि दग्धं मया स्वमस्तित्वम्,
कथेति तस्य पुरः केन कथ्यतामथवा ।

लगेत् कदाचन तस्मिंस्त्वदीरितः शापः,
किमप्यसङ्गतमेतन्न भण्यतामथवा ।

अयं समाधिरहो तस्य किं निरीहस्य,
समागतेन च तेनेह पृच्छ्यतामथवा ।

न मध्य एव कथायाः कुरुष्व रे प्रश्नान्,
समाप्तिमेति न यावन्निशम्यतामथवा ।

द्रुतेन किं फलमथवा विलम्बितेनास्य,
तदोयपत्रमितीदं हि पठ्यतामथवा ।

निराश एव 'जगन्नाथ' प्रस्थितो न भव,
तदीक्षितेन त्वयीत्थं निपत्यतामथवा ।

पाषाणमेकमेवमिमं पूजयाम्यहम्,
सर्वस्वमेकमेव निजं पूजयाम्यहम् ।

शृणुते न या न वीक्षत एवञ्च प्रार्थिता,
तां देवतां सदैवमलं पूजयाम्यहम् ।

कस्यापि काचिदेव भवेदत्र देवता,
पाषाणमेकमेव हि तं पूजयाम्यहम् ।

तस्मात् सुपूजितान्नहि सिद्धं मदीप्सितम्,
तदपीह सन्ततं बत तं पूजयाम्यहम् ।

मद्भावनैव सम्प्रति तद् दैवतं व्यधात्,
मृदु वा तदस्तु वा कठिनं पूजयाम्यहम् ।

काठिन्यमीदृशं नहि मे तस्य रोचते,
कठिनं तदेव दैवतकं पूजयाम्यहम् ।

वासाय तस्य नैव च हृदयं ममोचितम्,
तत्रैव तं निधाय च तं पूजयाम्यहम् ।

अनुकूलताऽस्ति यस्य न प्रकृतिर्जनं तु तम्,
अनुकूलमेव कर्तुमलं पूजयाम्यहम् ।

यदभूत् कृते ममेह यथार्थं हि दैवतम्,
अचलं भवेच्चलं तदिदं पूजयाम्यहम् ।

तां पूजय त्वमेव 'जगन्नाथ' देवताम्,
तद्भिन्नमेव देवमियं पूजयाम्यहम् ।

दीपकः कश्चिदहो नैव कदाचिज्ज्वलति,
कोऽपि खद्योत इतो नैव कदाचिज्ज्वलति ।

दग्धदग्धे मम गेहे मम सर्वं दग्धम्,
एकमात्रं तु निराशैव कदाचिज्ज्वलति ।

या सखीभावमुपेता मम चिन्ता लोके,
मत्समीपे सरला सैव कदाचिज्ज्वलति ।

मन्मता यैव, त्वदीये वत कठिने हृदि, सा,
नैव करुणाऽपि क्षणं दैव कदाचिज्ज्वलति ।

यस्य सकलं ज्वलितं तस्य कृते का चिन्ता,
हन्त तस्यापि गृहं नैव कदाचिज्ज्वलति ।

सर्वमस्तित्वमिदं भस्म मदीयं जातम्,
अग्निकण एक इतो नैव कदाचिज्ज्वलति ।

कोऽपि नास्कन्दतु पद्भ्यामिदमस्तित्वं मे,
मादृशानामिह भस्मैव कदाचिज्ज्वलति ।

मां नु दग्ध्वैव प्रकटयन्ति जना वैदग्ध्यम्,
किं मदस्तित्वमिदं नैव कदाचिज्ज्वलति ।

यस्य भाग्ये ज्वलितं नैव, स दग्धो दग्धः
भाग्यहीनो हि जनो नैव कदाचिज्ज्वलति ।

येन ज्वलितोऽसि 'जगन्नाथ' जगत्यामस्याम्,
किं स कालेन जनो नैव कदाचिज्ज्वलति ।

—२०—

मामेवमेव दुर्व्यथितं को नु सान्त्वयेत्,
मां हन्त सत्पथाच्चलितं को नु सान्त्वयेत् ।

यस्यच्छलं न चेतसि जागर्ति सर्वथा,
तेनैव हन्त मां छलितं को नु सान्त्वयेत् ।

नक्तन्दिवं सुपूजितमभवन्मया नु यत्,
तेनैव मां पदा दलितं को नु सान्त्वयेत् ।

किञ्चित् स्थिरो भव क्षणमुत्थापयामि त्वाम्,
वचसेति मामिह स्खलितं को नु सान्त्वयेत् ।

तस्याधरमनवाप्य पतिष्णुं निगृह्य माम्,
मधुपात्रतः समुच्छलितं को नु सान्त्वयेत् ।

स्पृष्टो न यः पदा बत तस्यैव पादयोः,
मां सकरुणस्तथा पतितं को नु सान्त्वयेत् ।

संरक्षितो मया पवनाद् योऽभवत् सदा,
दीपेन तेन मां ज्वलितं को नु सान्त्वयेत् ।

उत्थापयामि त्वामिति यः सुहृदिहोचिवान्,
तेनैव हन्त मां नमितं को नु सान्त्वयेत् ।

यत्रैव द्वारि तस्य पुरा सत्कृतोऽभवम्,
मां तत्र धूलिधूसरितं को नु सान्त्वयेत् ।

कस्त्वं वदेति सोऽपि 'जगन्नाथ' पृच्छति,
त्वां तेन साम्प्रतं मिलितं को नु सान्त्वयेत् ।

शिलाखण्डेषु ये वा देवबुद्धिं हन्त बध्नन्ति,
न किं ते बिन्दुमात्रे पूर्णमब्धिं हन्त बध्नन्ति ।

न येषामनुभवो लोकस्वभावस्येह ते मृदवः,
कठोरैः प्रस्तरैः साकं स्वसन्धिं हन्त बध्नन्ति ।

न येषामस्ति विश्वासः कथञ्चित् साम्प्रतं दैवे,
जना एवेह ते कोषे समृद्धिं हन्त बध्नन्ति ।

चलन्तो वर्त्मनि प्रणयाख्य एते किन्तु मतिशून्याः,
यथा ते जागतीं लब्धां प्रसिद्धिं हन्त बध्नन्ति ।

न जानन्तीह शुद्धौ भावनायाः कारणत्वं ये,
कदाचित्ते नदीनामप्सु शुद्धिं हन्त बध्नन्ति ।

जना जानन्ति केचिन्नैव मर्यादां न वा सीमाम्,
त एवामीषु तटवन्येषु जलधिं हन्त बध्नन्ति ।

इतः सन्तीव मनसो दासभावं केचिदुपलब्धाः,
स्थितास्ते चत्वरे जटिलाः समाधिं हन्त बध्नन्ति ।

प्रवाहो जीवनं नामाति दूरादेष आयाति,
विवेकेनैव रहिता वा तदवधिं हन्त बध्नन्ति ।

'जगन्नाथ' त्वमसि जगतीह सर्वत्रैव रे व्याप्तः,
कथं ते देशकालाभ्यां नु परिधिं हन्त बध्नन्ति ।

चित्तस्य हन्त चिन्तितं कस्मै निवेद्यताम्,
को वा शृणोति भाषितं कस्मै निवेद्यताम् ।

को धारयेद् गलेन सहर्षं मम स्रजम्,
व्यर्थं मयेह गुम्फितं कस्मै निवेद्यताम् ।

पुष्पं हि मत्करस्थमिदं याति शुष्कताम्,
एतन्मया सुगन्धितं कस्मै निवेद्यताम् ।

देवा निलीय सन्ति कियन्तो न साम्प्रतम्,
न शृणोति कोऽपि मन्त्रितं कस्मै निवेद्यताम् ।

एकान्त ईदृशो हि मे यातीह व्यर्थताम्,
तन्त्र्या हृदोऽथ झङ्कृतं कस्मै निवेद्यताम् ।

अतिरिच्यते न पीडितान्मम कोऽपि परिचयः,
आत्मानमेव पीडितं कस्मै निवेद्यताम् ।

शृणुयान्न कोऽपि मामकं चेत् प्रार्थितं जनः,
एतन्मयेह प्रार्थितं कस्मै निवेद्यताम् ।

सर्वो हि शङ्कते मयि यत्रैव याम्यहम्,
हृदयस्य किञ्चिदीहितं कस्मै निवेद्यताम् ।

मृदवः कियत् कठोरतराः सन्त्यमी हृदि,
निजभावितं सुविस्तृतं कस्मै निवेद्यताम् ।

जानासि 'जगन्नाथ' न त्वं लौकिकीं स्थितिम्,
अपहाय त्वां सुभाषितं कस्मै निवेद्यताम् ।

सिद्धान्तितं न शप्तमिदं जीवनं मया,
न च वर्जितं प्रतप्तमिदं जीवनं मया।

विदधाति तद् यदेव नु तस्मै प्ररोचते,
उद्घाटितं न गुप्तमिदं जीवनं मया।

भागे नु यस्य किञ्च दिनं वा प्रकाशताम्,
उररीकृतं प्रसुप्तमिदं जीवनं मया।

धन्यस्य नाम तेन समं यान्ति वासराः,
विरहे वृतं ह्यतृप्तमिदं जीवनं मया।

कस्मै निवेद्यतामिह शुश्रूषते च कः,
नैवाभिधेयमाप्तमितं जीवनं मया।

तस्मै न रोचतामथवा रोचतामिदम्,
विनिवेदितं हि दृप्तमिदं जीवनं मया।

अद्यावधीह त्यक्तमहो गायनैर्नु यत्,
गीतं तदेव गीतमिदं जीवनं मया।

पश्चात्तपन्ति केचिदमी सज्जनाः कथम्,
तेभ्यो न किञ्चिदुक्तमिदं जीवनं मया।

भ्रान्तोऽसि सर्वथैव 'जगन्नाथ' साम्प्रतम्,
नैव त्वदीयमुक्तमिदं जीवनं मया।

मदीया कैव स्थितिरेषा न रागो वा न वा द्वेषः
त्वदीया कैव गतिरेषा न रागो वा न वा द्वेषः ।

इदानीमपि विराजन्ते त एव स्नेहिनो लोकाः,
परं तेषां क्व मतिरेषा न रागो वा न वा द्वेषः ।

मदीयास्त्वत्परा एवेह सर्वे सन्ति व्यवहाराः,
त्वया कल्प्योऽत्र, नतिरेषा, न रागो वा न वा द्वेषः ।

विकृतयः सन्त्यमी रागा विकृतयः सन्त्यमी द्वेषः,
मता काचित् प्रकृतिरेषा न रागो वा न वा द्वेषः ।

कृतित्वं यत्र तत्रैवास्ति रागो वाऽथवा द्वेषः,
इतः काचिन्न कृतिरेषा न वा रागो न वा द्वेषः ।

सुगीतं गीयतां यस्मिन् न कश्चिद् वर्ततां द्वेषः,
न वा छन्दो न यतिरेषा न रागो वा न वा द्वेषः ।

न तस्मिन् कोऽप्यभिप्रायः सुलक्ष्यो यत्त्वयोत्तरितम्,
मम स्नेहस्य हृतिरेषा न रागो वा न वा द्वेषः ।

सुलब्धः केनचिद् रागस्त्वदाप्तः केनचिद् द्वेषः,
इदानीं मम नियतिरेषा न रागो वा न वा द्वेषः ।

घटत्येवं हि रागद्वेषयोर्निजकैः स्थितिर्लोके,
निजानां मेऽस्ति ततिरेषा न रागो वा न वा द्वेषः ।

'जगन्नाथ' त्वदीयो नेह कश्चिल्लभ्यते स्वजनः,
त्वदीया का प्रगतिरेषा न रागो वा न वा द्वेषः ।

तेन जनेन मेऽधुना न किमपि स्वमर्पितम्,
तस्मै मयाऽविवेकिना सकलमपि स्वमर्पितम् ।

तेन तु नैव स्वीकृतं मम सुनीडमुपवने,
तस्मै मया सुविस्तृतोपवनमपि स्वमर्पितम् ।

तेन न मे प्रदत्तमाः ! किमपि दीपकं करे,
तस्मै मया समादराद् गगनमपि स्वमर्पितम् ।

तेन जनेन दृक्कणो मयि निजो न पातितः,
तस्मै मया समग्रमस्तित्वमपि स्वमर्पितम् ।

स्मितमहो न चेष्टितं दातुमपीह तेन मे,
तस्मै मया ससम्मदं वदनमपि स्वमर्पितम् ।

तेन न मह्यमनुमतो दातुमहो निजः क्षणः,
तस्मै मयाऽविशङ्कितं जीवनमपि स्वमर्पितम् ।

तेन तु मह्यमनुमतं स्वविषयमपि न दातुमाः !
तस्मै मया निजात् करादमृतमपि स्वमर्पितम् ।

तेन जनेन पश्यताऽपि न मयीह दृष्टमाः !
तस्मै मयेह सर्वथा नयनमपि स्वमर्पितम् ।

तस्य कृते कथं मया सम्प्रति हन्त दूयताम्,
येन न हन्त मे क्षणं हृदयमपि स्वमर्पितम् ।

हसितकाय तस्य रे किमधुना त्वमुत्ताम्यसि,
येन न तुभ्यमादराद् रुदितमपि स्वमर्पितम् ।

यस्य न कोऽपि दृश्यते तस्य भवेन्नु का गतिः,
यस्य न स्वोऽवशिष्यते तस्य भवेन्नु का गतिः।

मर्तव्यमेव किं मया सार्थकता कुतो मम,
यो नहि तेन लक्ष्यते तस्य भवेन्नु का गतिः।

मौनमिदं न सर्वथा सेत्स्यति किञ्चिदात्मनः,
येन सदैव दह्यते तस्य भवेन्नु का गतिः।

परिचिनोति नैव यं हन्त गृहेऽपि कश्चन,
यो न कुतोऽपि मन्यते तस्य भवेन्नु का गतिः।

भार इवैष जीवनं स्कन्धयुगेन स्वेन चेत्,
येन हि नैष उह्यते तस्य भवेन्नु का गतिः।

तन्नु विलोक्य तद्दृशः किञ्चन चेष्टितं मुहुः'
येन न तत्र गम्यते तस्य भवेन्नु का गतिः।

वञ्चनमेव केवलं व्याप्तमितस्ततोऽथ चेत्,
येन न तत्परोक्ष्यते तस्य भवेन्नु का गतिः।

आतप एव चन्द्रिका भवति यत्कृते तथा,
तेन तु सा न सह्यते तस्य भवेन्नु का गतिः।

द्वारि स्थितोऽपि तस्य यो दूरत आगतो जनः,
चेन्नहि तेन पृच्छ्यते तस्य भवेन्नु का गतिः।

पश्य गृहीतवानसौ नैव 'जगन्नाथ' त्वाम्,
यो नहि गृह्यते तस्य भवेन्नु का गतिः।

मदीयं चिन्तितं सकलं शुभाङ्गि त्वद्गतं जाने,
स्वकीयं मानसं विकलं शुभङ्गि त्वद्गतं जाने ।

मदस्तित्वं कलङ्काः किञ्चिदावृत्येव तिष्ठन्ति,
तथापि स्वं सदा विमलं शुभाङ्गि त्वद्गतं जाने ।
न यत्ते रोचते किञ्चित् तथा प्रतिकूलमपि यत् ते,
तदमृतं सर्वथा गरलं शुभाङ्गि त्वद्गतं जाने ।
यदासीत् कण्टकाकीर्णं यदासीत् सर्वथोद्घाति,
तदयनं साम्प्रतं सरलं शुभाङ्गि त्वद्गतं जाने ।
स्वपक्षे कण्टको ननु यः स एव प्रीतये मम रे,
विकसितं मृदु सदा कमलं शुभाङ्गि त्वद्गतं जाने ।
यदासीन्निष्फलं भागे मदीये हन्त मद्भाग्यात्,
तदेवं सर्वतः सफलं शुभाङ्गि त्वद्गतं जाने ।
मदीयं हन्त नैराश्यं विधते निर्वलं सकलम्,
तदेवाशान्वितं सवलं शुभाङ्गि त्वद्गतं जाने ।
कठोरं यद् यदास्ते हन्त पक्षे तत्तथा त्याज्यम्,
तदेव ग्राह्यमथ मृदुलं शुभाङ्गि त्वद्गतं जाने ।
कियद्वाऽस्माभिरवगाह्यं कियद्वाऽस्माभिरनुमेयम्,
तदेतन्मानसं त्वतलं शुभाङ्गि त्वद्गतं जाने ।
'जगन्नाथ' कुतोऽप्यन्यत्र कियदपि भवतु गम्भोरः,
तमेवं सर्वथा तरलं शुभाङ्गि त्वद्गतं जाने ।

—२१—

पश्यामि सर्वतो बत मे नैव निर्वृतिः,
गहने च सर्वथा सदने नैव निर्वृतिः।

तद् दूरमेव यातमिदानीं यदीप्सितम्,
अनभीष्टमेति सन्निकटे, नैव निर्वृतिः।

यस्यैव जनस्येह कथा विस्मृता मया,
बहुवारमेति स स्मरणे, नैव निर्वृतिः।

पूर्येत वर्त्मना बत केनेह काङ्क्षितम्,
क्व कियत् समाश्रये ह्ययने, नैव निर्वृतिः।

तस्यैष चेष्टितस्य कृते चेष्टितं मम,
चेष्टेत यो न किञ्चन, मे नैव निर्वृतिः।

नैराश्यमेव हन्त जरीजृम्भते मयि,
आशा न किञ्चिदारभते, नैव निर्वृतिः।

सिध्यत्यभीक्षितं बत सर्वात्मना मम,
रुदितेऽथवाऽथवा हसिते, नैव निर्वृतिः।

न प्रस्तरे तथा च समीहे न विस्तरे,
सर्वत्र कण्टकः स्मयते, नैव निर्वृतिः।

इत्थं ममैव न व्यथितं हन्त सर्वथा,
तस्यापि चित्तमुद्व्यथते, नैव निर्वृतिः।

जायेत भाव एष 'जगन्नाथ' त्वादृशि,
तृष्णाधिके कथञ्चन मे, नैव निर्वृतिः।

नैव गन्तव्यमेवं त्वया,
नैव वक्तव्यमेवं त्वया।

किञ्चिदर्धं निमील्याक्षिणी,
नैव द्रष्टव्यमेव त्वया।

हन्त संसार एकाकिना
नैव रन्तव्यमेवं त्वया।

मत्कृतं विप्रियं त्वां प्रति,
किन्न क्षन्तव्यमेवं त्वया।

यद् विनश्येत् स्वयं सर्वथा,
तन्न हन्तव्यमेवं त्वया।

सम्भवेद् यस्य नैवोत्तरम्,
तन्न प्रष्टव्यमेवं त्वया।

वैरमार्द्रापराधे मयि,
नैव बद्धव्यमेवं त्वया।

प्राप्तकाले ममेव क्वचित्,
नैव दग्धव्यमेवं त्वया।

नैव स्निह्यन्त्यमीति क्वचित्,
नैव मन्तव्यमेवं त्वया।

त्वां 'जगन्नाथ' किं वच्म्यहम्,
नैव वक्तव्यमेवं त्वया।

किं विधेयं किं वदेयं नैव तस्यानुग्रहः,
किञ्च हेयं किञ्च देयं नैव तस्यानुग्रहः ।

कोऽपि तस्मै मद्व्यथामेनां क्षणं विनिवेदयेत्,
कस्य कस्याग्रे व्रजेयं नैव तस्यानुग्रहः ।

नैव मयि तद्दृष्टिपातः किञ्चिदुल्लसतीत्यहम्,
कस्य कस्याग्रे वदेयं नैव तस्यानुग्रहः ।

निर्झरस्तदनुग्रहो वहतीति किं नहि वेद्म्यहम्,
मयि कथं वा, किं वदेयं नैव तस्यानुग्रहः ।

स्नेह एष सदैव मां व्यवसाययत्युल्लङ्घितुम्,
तत् कियद् धैर्यं वहेयं नैव तस्यानुग्रहः ।

भार एष प्रस्तराणामिव मदीयं जीवनम्,
केन विधिना तच्च नेयं नैव तस्यानुग्रहः ।

तत्करादमृतं कियच्च प्रतीक्षणीयं तन्मया,
साम्प्रतं विषमेव पेयं नैव तस्यानुग्रहः ।

भग्नया नैराश्यतो हृद्वीणया मम सर्वथा,
तत्पुरस्तात् किन्नु मेयं नैव तस्यानुग्रहः ।

किं न सोढं तत्पथे चलता मया तत्प्रणयतः,
किन्तु सह्या न व्यथेयं नैव तस्यानुग्रहः ।

स्वं 'जगन्नाथ' त्वमस्माकं पुरः प्रकटीकुरु,
वदति तस्मिन् किं वदेयं नैव तस्यानुग्रहः ।

कस्यापि प्रस्तरस्य कथा किं निवेद्यताम्,
स्थितिरात्मनो यथाऽस्ति तथा किं निवेद्यताम् ।

यस्यैव चिन्त्यते विषये याति सोऽन्तिकात्,
दूरं गतं प्रतीह वृथा किं निवेद्यताम् ।

दैवं ममानुकूलमहो नैव वर्तते,
विनिवेदनीयमेव तथा किं निवेद्यताम् ।

छायाऽपि मे मया न समं चलितुमीहते,
चेष्टेत तत्कथं स तथा किं निवेद्यताम् ।

मायैव तस्य सर्वमिहावृत्य तिष्ठति,
श्रूयेत नैव तेन कथा किं निवेद्यताम् ।

नैवोपलप्स्यते स मया मे निवेद्यताम्,
चलताऽपि येन केन पथा किं निवेद्यताम् ।

श्रोष्यामि नेति येन दृढं निश्चयः कृतः,
व्यथितस्य तं प्रतीह व्यथा किं निवेद्यताम् ।

भग्ना तरी निजेन करेणैव तेन मे,
मज्जामि सम्प्रतीति तथा किं निवेद्यताम् ।

यन्नाम्नि वा श्रुतेऽपि व्यथा कस्यचिद् भवेत्,
तस्येह सव्यथस्य व्यथा किं निवेद्यताम् ।

मौनं भजस्व तस्य 'जगन्नाथ' न स्मर,
तस्येह निर्व्यथस्य कथा किं निवेद्यताम् ।

किञ्चिदाप्तं न परं विहसद्भिः,
यापितैर्यातमलं विहसद्भिः।

मां रुदन्तं क उपेयादारात्,
स्वैर्जनैस्त्यक्तमलं विहसद्भिः।

कः प्रतीक्षेत पुनस्तान् यातान्,
वञ्चितः स्वैः सततं विहसद्भिः।

नेह सम्भाव्यमरे स्वं कुशलम्,
भाषितं कैश्चिदिदं विहसद्भिः।

मां तपन्तं मरुभूमौ त्यक्त्वा,
यातमेतैरधिकं विहसद्भिः।

किन्न तैरित्थमलं रुदितव्यम्,
यैरितो यातमरं विहसद्भिः।

यद् रुदद्भिर्विहितं नहि रिपुभिः,
तत्सुहृद्भिर्विहितं विहसद्भिः।

शयितमरिभिर्निकटे विरुदद्भिः,
स्वैः सुदूरे शयितं विहसद्भिः।

मत्त इति मेऽद्य शिरः प्रस्तरकैः,
बालकैरेव क्षतं विहसद्भिः।

त्वं 'जगन्नाथ' तिष्ठ मा तावत्,
याहि तैरेव समं विहसद्भिः।

किमस्ति जीवनमेतज्जनेन तेन विना,
दिनं दिनं न, निशा वा निशा न, तेन विना।

पलालजालमिवैतत् समग्रमस्तित्वम्,
बहिर्विधेयमिदानीं जनेन तेन विना।

विनश्यतीदमहो सन्निपत्य स्वयमेव,
मदश्रु केन विनेयं जनेन तेन विना।

सभासु स्निग्धजनानां कथाप्रसङ्गेन,
ममाभिधान मुदीर्येत केन, तेन विना।

न कश्चिदेव ममेहावशिष्यते स्वजनः,
जगद्धि शून्यमिदानीं जनेन तेन विना।

न काचिदस्ति पिपासा न कापि जिज्ञासा,
किमेव हन्त विधेयं जनेन तेन विना।

तदेव जातमिदानीं हि येन भवितव्यम्,
निवारणीयमिदं किं जनेन तेन विना।

सुभाषितानि बहूनीह भाषितव्यानि,
क एव सम्प्रति शृणुयाज्जनेन तेन विना।

त्वयाऽपि तत्र 'जगन्नाथ' नैव गन्तव्यम्,
क एव त्वां वद शृणुयाज्जनेन तेन विना।

सापराधेन तन्मया भाव्यम्,
नैव तद्धृदि क्रुधाऽन्यथा भाव्यम् ।

शङ्कनीयं न किञ्चिदस्मासु,
न त्वया क्रुद्धया मुधा भाव्यम् ।

रागबन्धो यदा न व्याख्येयः,
अस्य न व्याख्यया तदा भाव्यम् ।

रक्तरक्ते हि तदधरे किञ्चित्,
उद्गतेन स्मितेन वा भाव्यम् ।

मामकं मानसं धुनातीयम्,
न त्वया सेर्ष्ययाऽधुना भाव्यम् ।

सत्प्रसूनानि पश्य म्लायन्ति,
न त्वयाऽनावृतास्यया भाव्यम् ।

निष्पतेयुर्न तारका नभसः,
निशि न भवनोपरिस्थया भाव्यम् ।

तत्पुरो मच्छिरो भवेद् विनतम्,
यत्र किञ्चिन्मदास्थया भाव्यम् ।

सान्धकारे मदीयहृदि भग्ने,
दीपशिखयेव ज्वलितया भाव्यम् ।

मां 'जगन्नाथ' मेवमवमत्य,
फलितया किं तवेहया भाव्यम् ।

कियांश्च विघ्न उपेयान्न किन्तु विरमन्ति,
त्वदात्तचेतस एते न किन्तु विरमन्ति ।

प्रदीपका इह तिष्ठन्ति केऽपि निर्वाणाः,
तथाप्यमी बत ज्वलनान्न किन्तु विरमन्ति ।
तवैव काचिदहो चेष्टितस्य लीलेयम्,
निवारिता अपि प्रणयान्न किन्तु विरमन्ति ।
प्रियं नु हृद्गतमधिगत्य को नु चेष्टेत,
स्वभावस्निग्धतरास्ते न किन्तु विरमन्ति ।
अभीप्सितं हि सुखं कस्य नैव वा जगति,
सुखादमी भवदीया न किन्तु विरमन्ति ।
यदेव वा रुदितं हन्त यच्च वा हसितम्,
भवज्जना उभयेऽमी न किन्तु विरमन्ति ।
वधान नाम कियत् पञ्जरेषु वा विहगान्,
अमी स्वचेतसा गगनान्न किन्तु विरमन्ति ।
समीहितानि मदीयानि त्वद्गतान्येव,
निवारयापि कियद् वा, न किन्तु विरमन्ति ।
कियच्च तुभ्यमरे दैन्यमेतदस्माकम्,
वयं हि ते निजदैन्यान्न किन्तु विरमन्ति ।
निजस्य विद्धि 'जगन्नाथ' नैव वैफल्यम्,
स्वनिश्चयाद् विफला वा न किन्तु विरमन्ति ।

—२२—

साधितं किन्नु भवेत् किञ्चिदधीरस्त्वमसि,
न प्रतीक्ष्येत त्वया किञ्चिदधीरस्त्वमसि।

हन्त वैफल्यमुपश्रुत्य मम स्निग्धेन,
व्याहृतं केनचिदाः! किञ्चिदधीरस्त्वमसि।

त्वत्समीपं स्वयमेवायमुपेयाच्चषकः,
हेतुना केन ततः किञ्चिदधीरस्त्वमसि।

तिष्ठ गोष्ठीयमरे काऽपि महाधीराणाम्,
धैर्यमवलम्ब परं किञ्चिदधीरस्त्वमसि।

इङ्गितं नैव तदा तस्य तदानीं दृष्टम्,
उपहृता प्रणतिरियं किञ्चिदधीरस्त्वमसि।

भूय आयान्ति क्षणाः केचन नैव प्रीतेः,
न प्रमत्तोऽसि परं किञ्चिदधीरस्त्वमसि।

त्वादृशे नैवमधीरे हि फलन्त्युपदेशाः,
नैव वाच्यं तदहो किञ्चिदधीरस्त्वमसि।

त्वां रहस्यं हि वदाम्येष न वाच्यं क्वचन,
नो वदाम्येव परं किञ्चिदधीरस्त्वमसि।

प्रातरुत्थाय प्रयातोऽसि तदीयं द्वारम्,
किं निवृत्तो विफलः किञ्चिदधीरस्त्वमसि।

दूरतः केचन दृश्यन्त इमेऽलं रम्याः,
हे 'जगन्नाथ' परं किञ्चिदधीरस्त्वमसि।

नैव हृदि तस्य जनस्येह व्रणः सम्भवति,
कोऽपि म्रियते परतो यस्य क्षणः सम्भवति ।

गणनया तस्य हि भाव्यं ननु कस्मिन् वर्गे,
यस्य वदने नहि हासस्य कणः सम्भवति ।

तस्य बहुशो नु मया विहितमहो सन्धानम्,
प्रेम्णि न च्छन्दसि कोऽप्येव गणः सम्भवति ।

मन्यते यो न मदीयं वचनं हठभरितः,
तेन सार्धं स्वजनेनेह रणः सम्भवति ।

स्मितमुदयतीव न दृष्टे मयि वदने यस्य,
तेन साकं मम नैवेह पणः सम्भवति ।

येन विफलीकृत एषोऽहमभूवं जगति,
वञ्चने कोऽपि स लोकस्य चणः सम्भवति ।

नैवमाकारयेदन्यो ननु गत्वा पश्य,
आगतो द्वारि मम श्यामघनः सम्भवति ।

पश्यतोहरतया यस्यास्ति प्रसिद्धिर्लोके,
पश्य ध्यानेन स एव स्वजनः सम्भवति ।

इत्थमार्द्रं नहि सामन्यरवो विदधाति,
नूपुराणामिव तस्येह क्वणः सम्भवति ।

यत्र नास्तीव 'जगन्नाथ' मृदुव्यवहारः,
किन्तु लग्नं तव तत्रापि मनः सम्भवति ।

रुदितं ममेह सम्प्रति तस्मै न रोचते,
हसितं ममेह सम्प्रति तस्मै न रोचते ।

मौनं कियन्नु तस्य पुरो वाऽवलम्ब्यताम्,
कथितं ममेह सम्प्रति तस्मै न रोचते ।

प्रीतेर्ममैव काचिदियं परिणतिर्भवेत्,
विनिवेदयामि तं प्रति तस्मै न रोचते ।

कस्येह दुष्कृतस्य फलं प्राप्यते मया,
यद् वा करोमि तं प्रति तस्मै न रोचते ।

यदिदं विलोचनं मम तेनैव मेऽर्पितम्,
विनिपातयामि तं प्रति तस्मै न रोचते ।

सव्यङ्ग्यभाषितानि तु व्यक्तानि सर्वथा,
स्निग्धं वचोऽपि तं प्रति तस्मै न रोचते ।

येनैव चेष्टितेन स जातः सुहृन्मम,
तच्चेष्टितं नु सम्प्रति तस्मै न रोचते ।

रुदितातिरिक्तमेत्र न मे हन्त जीवनम्,
रुदितं तु किञ्च सम्प्रति तस्मै न रोचते ।

आत्मानमेव विस्तृतं बहुधाऽहमात्मना,
परिचाययामि तं प्रति तस्मै न रोचते ।

त्वत्पत्रकं तु तेन 'जगन्नाथ' वीक्षितम्,
त्वच्चेष्टितं तु तं प्रति तस्मै न रोचते ।

स्खलितं पथीह प्रेक्ष्य स किं मामुदीरयेत्,
अवलम्बयेदवेक्ष्य स किं मामुदीरयेत् ।

विनिवेदयेन्निजां स कथामेव केवलाम्,
विनिशम्य मद्व्यथाञ्च स किं मामुदीरयेत् ।

यस्मै निवेदनीयमिदं नैव स शृणुयात्,
विनिवेदिते ततोऽपि स किं मामुदीरयेत् ।

स्निग्धेषु सर्वतोऽपि जनेषु स्थितेष्वहो,
परिचित्य पूर्णतोऽपि स किं मामुदीरयेत् ।

करुणावशादुदारतया सव्यथे मयि,
समुदीरयेदथापि स किं मामुदीरयेत् ।

मच्चेष्टितस्य किन्नु फलं मात्रमेतद्धा: !
बहु वक्तुमुत्सुकोऽपि स किं मामुदीरयेत् ।

मत्प्रार्थितं निशम्य किमप्यार्द्र आत्मनि,
समुदीरणोत्सुकोऽपि स किं मामुदीरयेत् ।

छायैव येन काचन नित्यं समाश्रिता,
चिरमातपे स्थितं हि स किं मामुदीरयेत् ।

अनुपस्थिते मयीह मुहुर्भाषिते स चेत्,
समुपस्थितं विलोक्य स किं मामुदारयेत् ।

कश्चिद् व्यथागतं न 'जगन्नाथ' मीक्षते,
अस्यां स्थितौ निजोऽपि स किं मामुदीरयेत् ।

तुभ्यं कदैवमर्पितं करवाणि जीवितम्,
एवं कदा नु सार्थकं करवाणि जीवितम् ।

सन्देश एष्यतीति दुराशैव लक्ष्यते,
कियदेवमाशयान्वितं करवाणि जीवितम् ।

मां किञ्चिदादरेण त्वमाकारयेरिह,
क्षणमेवमात्मनि स्थिरं करवाणि जीवितम् ।

एवं पराजयोऽपि मदीयो न किं जयः,
स्वं चेत्त्वया पराजितं करवाणि जीवितम् ।

यन्मामकं तदस्ति तवैवेह सर्वथा,
एव कदा नु भावितं करवाणि जीवितम् ।

पुरतस्तवैतदस्ति लिख त्वं यदिच्छसि,
एवं कदानु पत्रकं करवाणि जीवितम् ।

भग्नस्य मामकस्य हृदो ह्येकमीहितम्,
तुभ्यं कदा निवेदितं करवाणि जीवितम् ।

तव स्निग्धहासस्य कोऽयं प्रकारः,
तव प्रीतिपाशस्य कोऽयं प्रकारः !

न जाने, न जाने, कथञ्चिन्न जाने,
त्वदक्ष्णोर्विलासस्य कोऽयं प्रकारः !

कला किं हिमांशोः, त्वमेवाभिधेहि,
स्ववयसो विकासस्य कोऽयं प्रकारः !

अदत्त्वैव सङ्केतमेवं त्वदीयो,
हृदब्जे निवासस्य कोऽयं प्रकारः !

जगद्रूप उद्भासते यः समन्तात्,
स लीलाविलासस्य कोऽयं प्रकारः !

न दृष्टया भवेत् सूक्ष्मयाऽप्येव लक्ष्यः
त्वदीयप्रयासस्य कोऽयं प्रकारः !

समुत्पीडयेदेव यः स्निग्धलोकान्,
त्वदीय प्रतापस्य कोऽयं प्रकारः !

यमासाद्य मन्ये रुदन्त्येव सर्वे,
त्वदीयप्रसादस्य कोऽयं प्रकारः !

परावर्तनं यत्फलं नैव, नैव,
त्वदीयप्रवासस्य कोऽयं प्रकारः !

विदग्धा न दग्धा भवन्त्येव यस्मिन्,
तव प्रीतिदावस्य कोऽयं प्रकारः !

'जगन्नाथ' तस्यैव शरणं प्रयाहि,
तवारे विषादस्य कोऽयं प्रकारः !

दीयते, दीयतां जाने किमिदम्,
हस्तगं लक्ष्यते जाने किमिदम् ।

सर्वतो लक्ष्यते तस्यौदार्यम्,
हस्तयोर्बन्धनं दाने किमिदम् ।

दृश्यते सर्वतो योऽसौ मुखरः
तस्य मूकायितं गाने किमिदम् ।

स्वं तथा यः शनैराविष्कुरुते,
कृपण शीलं स्वसन्ताने किमिदम् ।

नैव कुत्रापि यस्मिन्नलसत्वम्,
तस्य मयि बाणसन्धाने किमिदम् ।

सन्ततं तिष्ठति प्रीतः सार्धम्,
दूर गमनं तु सहपाने किमिदम् ।

मूर्च्छिते नैव किं याप्यं नु मया,
भागजातं न संज्ञाने किमिदम् ।

प्रज्वलित एव किं, तिष्ठेयमिह,
यत्र हि किञ्चिन्न निर्वाणे किमिदम् ।

आग्रहो विकसितेऽप्येवं तव कः
नैवमाकर्षणं म्लाने किमिदम् ।

किं पदातिश्चलन् म्रियतामेषः
तस्य लभ्यं न वा याने किमिदम् ।

किं 'जगन्नाथ' आलस्यं तव रे,
तस्य ते कांक्षितं हाने किमिदम् ।

दृष्टयो मां प्रति कस्यापि निमोलन्त्येवम्
किन्नु भाग्यानि मदीयानि निमीलन्त्येवम् ।

यानि तत्सङ्गये विकसन्ति मया दृष्टानि,
तत्प्रयाणे परितस्तानि निमीलन्त्येवम् ।

कस्यचित् किन्नु सुविदितं भुवि निश्चिन्तस्य,
यच्च नैराश्यतो हृदयानि निमीलन्त्येवम् ।

तस्य भिणितं ननु सत्यं नहि सन्देहो मे,
स स्वभावो मृदुचित्तानि निमीलन्त्येवम् ।

को विजानाति वसन्ते कथमायातेऽपि,
मुग्धमुग्धाम्यपि कुसुमानि निमीलन्त्येवम् ।

शोभते सम्प्रति मूकायितमेवं जगति,
वस्तु जातानि हि मुखराणि निमीलन्त्येवम् ।

दृश्यते हन्त विधातस्तव कोऽयं नियमः,
भुव उत्पद्य हि सकलानि निमीलन्त्येवम् ।

नैवमुत्ताम्य 'जगन्नाथ' न चैकस्त्वमिह,
जगति सर्वाणि विकसितानि निमीलन्त्येवम् ।

लाभः कियानिवेह वृथा जीवितस्य मे,
किञ्चित्सुखं हि नैव तथा सीमितस्य मे।

सत्यं ब्रवीमि कोऽपि जनो विश्वसेन्न वा,
नासौ हि विश्रमाय धरा पीडितस्य मे।

शयितं क एव जागरयेन्मां शनैरिह,
नियतौ हि केवलैष निशा मीलितस्य मे।

श्रान्तोऽस्मि सूत्रधार ! कियन्नर्तयिष्यसि,
अङ्गानि विश्कलानि सदा क्रीडितस्य मे।

ज्वाला शमं प्रयातु कृपावारि वर्ष रे,
यान्तीति वासरा नु वृथा दीपितस्य मे।

तद्द्वारि येन केन प्रकारेण स्थीयते,
किञ्चन्नु स्याच्च स्याच्च न वा कीलितस्य मे।

मन्त्राक्षराणि तानि फलिष्यन्ति मे कदा,
स्मरणीयतां गतानि त्वया दीक्षितस्य मे।

फलितं पुरा कृतेन तथा किञ्चिदन्यथा,
सौभाग्यमेव तच्च त्वया शीलितस्य मे !

व्रीडा न त्वामपीत 'जगन्नाथ' परिभवेत्,
मा मैव हन्त गच्छ यथा पीडितस्य मे।

कथ्यतां किं, श्रोतुमपि वा तत्परः कश्चिद् भवेत्,
तत्परेण मयैव भाव्यं, मत्परः कश्चिद् भवेत् ।

एकहस्तेनैव ताली शक्यते दातुं न हि,
चेन्मया त्वरितेन भाव्यं, सत्वरः कश्चिद् भवेत् ।

मूकमूकेनैव स्थातव्यं यदि त्वत्सन्निधौ,
तिष्ठतात् स कथं नु, यो वा सत्वरः कश्चिद् भवेत् ।

पङ्गवः स्थानं लभन्ते केवलं तत्संसादि,
सोऽधुना निर्यातु यो वा गत्वरः कश्चिद् भवेत् ।

यत्त्वया वक्तव्य यस्मिन् सदसि तत्तु मितं भवेत्,
त्यज्यतां नियतं स चेदिह विस्तरः कश्चिद् भवेत् ।

गम्यतां तेनैव मार्गेणेति निर्णीतं मया,
कण्टकोऽत्र पदे पदे वा प्रस्तरः कश्चिद् भवेत् ।

नैव भाग्ये यस्य निद्रा तत्कृते का स्याद् मिदा,
प्रस्तरः कश्चिद् भवेद् वा संस्तरः कश्चिद् भवेत् ।

यातु नैवं कोऽपि रे दयनीयतायाः पात्रताम्,
यादृशो नैवेह तस्मिन् निर्भरः कश्चिद् भवेत् ।

तस्य मन्तव्यं मया प्रतिकूलमप्यनुमोदितम्,
मम तु पक्ष इहावयोर्नहि संगरः कश्चिद् भवेत् ।

यस्तु सरलो योऽपि व हृदयेन किञ्चिद्व्याहरेत्,
मन्यते स हि नैव यत्राऽम्बरः कश्चिद् भवेत् ।

त्वां 'जगन्नाथं' स दूरे स्थातुमिह निर्दिशति रे,
तस्य दृष्ट्वा वैभवं त्वयि, मत्सरः कश्चिद् भवेत् ।

चन्द्रस्य द्रवं त्वामथ स्फटिकस्य वदेयम्,
किञ्चत्त्वमेव रे वद किं त्वाञ्च वदेयम् ।

आजन्मनो मरुत्वमुपेतो ह्ययं जनः
त्वद्दृष्टिरापतेदिह वद त्वञ्च कदेयम् ।

अस्य प्रवृत्तिरीदृशी, मिथ्यैव भाषते,
इत्थं मयीह भाषिणीं त्वां केन वदेयम् ।

नैव त्वयाऽतमीक्षितो रे संसदि स्थितः,
त्वां नैव रे वदेयमहो नैव वदेयम् ।

त्वदनुग्रहस्य को नु प्रतीकार एव स्यात्,
किं तुभ्यमेष देहमहो किञ्च वदेयम् ।

लब्धोऽपि भवेर्वा न त्वं परमेतदर्थये,
तिष्ठेन्मदीयचेतसि लिप्सैव सदेयम् ।

विलपाय मे नु केवलं तेऽलं निरीक्षितम्,
विषमेव तन्नु मत्कृते रे किञ्चन देयम् ।

एवं सति त्वयीह तु प्रतिकूलतां गते,
मौनं भजे त्वदग्रतो वा हन्त वदेयम् ।

जाने बहुभ्य एव दिनेभ्यो नु त्वामहम्,
किं तद् यदुक्तमेव न त्वां किञ्च वदेयम् ।

यस्यैव विश्वसोर्नु 'जगन्नाथ, साम्प्रतम्,
तेनैव वञ्चितोऽसि रे किं त्वाञ्च वदेयम् ।

त्वदीयं त्वदीयं, न किञ्चिन्मदीयम्
गृहाण त्वमेतद् यदेवं मदीयम्!

रहस्यं न किञ्चित्स्फुटं तावदेतत्,
त्वदीयादिदं नैव भिन्नं मदीयम्।
विधत्ते क एवावयोर्भेदबुद्धिम्,
यदस्तित्वमेतत् त्वदीयं मदीयम्।
यदेतन्महत् सर्वमेव त्वदीयम्,
लघीयस्तु तत्सर्वमेवं मदीयम्।
सुविस्तीर्णमुद्यानमेतत्त्वदीयम्,
किमप्येकमेतत् प्रसूनं मदीयम्,
यदेतत् समग्रं तव प्रेक्षणीयम्।
त्वमेवासि रे प्रेक्षणीयं मदीयम्:
बलं नाम यत्सर्वमेव त्वदीयम्,
बलं तु त्वमेवैक एव मदीयम्।
तवैवास्ति मन्ये महासागरत्वम्,
पृषत्त्वं तु तत्रैकमात्रं मदीयम्।
तवैवास्ति सूर्यत्वमेकं प्रसिद्धम्,
प्रदीपत्वमेवञ्च सिद्धं मदीयम्।
'जगन्नाथता' तु त्वदीयेतिमन्ये,
स्फुटं नाम मात्रं तदेकं मदीयम्।

तव दृङ्निपातनमेव हन्त ततोऽपि कारणतां गतम्,
सकलं तवाणुतरं कृते मम रे महत्तरतां गतम् ।

नहि वेत्सि किं विहितं त्वया तव हन्त पुष्पमुदीरितम्,
हृदि तस्य कोमलकोमले नियतञ्च प्रस्तरतां गतम् ।

पुनरेष्यतीति न विश्वसेः, गत एव यो गत एव सः,
अणु तस्य सम्प्रति भाषितं किमपीह विस्तरतां गतम् ।

क्वचिदेव सम्प्रति यास्यते भुवि कुत्रचिच्च शायिष्यते,
मम निर्गतस्य कृते गृहात् जगदेव संस्तरतां गतम् ।

अवलोकयामि कलामिमां परिकल्पतां तव पाणिना,
इह वस्तु सर्वमसुन्दरं क्षणमेव सुन्दरतां गतम् ।

सकलो हि लोक इतः स्थितस्तव दृङ्निपातमपेक्षते,
अभिधेहि, किञ्च तवाधुना जगदेव किञ्चरतां गतम् ।

समयः करोति बलाबलं नहि कोऽपि दोष इहावयोः,
नदि ! तेऽधुना जलमल्पकं मम हन्त दुस्तरतां गतम् ।

इतः कस्यापि भागे हसितहसितम्,
मदीये भाग एतद् रुदितरुदितम् ।

न किञ्चिच्चलितुमध्वनि हन्त शत्यः,
समापतितं समन्ताच्चलितचलितम् ।

सुमनसामुद्गतो यद्यपि कुलेऽहम्,
मदीये भाग्य एतद् मृदितमृदितम् ।

मदस्ति त्वं कुतः स्याद् रक्षितं रे,
यदि स्यात् त्वत्पदाभ्यां दलितदलितम् ।

त्वदीयाभ्यां कराभ्यां रक्ष रक्ष,
पयः पृषदीदृशं मां गलितगलितम् ।

त्वदीयं रूपमस्ति क्षीरजलधिः
मदस्तित्वं पुरस्तात् तृषिततृषितम् ।

किमद्यावधि जगत्यां दृष्टवानसि
कुतश्चिन्मामिवाहो लुठितलुठितम् ।

क्वचिद् दूरे स्वमार्गे लब्धवानसि,
'जगन्नाथख्यमेकं' पतितपतितम् ।

इतो गत्वा न योऽद्यावधि निवृत्तः,
जनं विस्मरणशीलं तं स्मरामः ।

सुतृषितैर्यैस्तृषा शमिता परेषाम्,
गतान् विस्मृति पथं ननु तान् स्मरामः ।

विषं पीतं समर्प्य सुधां परेभ्यः,
सुधन्यान् विरल विरलांस्तान् भजामः ।

स्थितं यैरातपे छाया च दत्ता,
परेभ्यस्तान् वयं प्रति किं वदामः ।

कठोरं सकलमेवाङ्गीकृतं यैः
परेभ्यो मृदु प्रदत्तं तान् नमामः ।

कोऽपि बध्नन्तीव चरणौ त्वद्दिशं चलितस्य मे,
कश्च वितरेदिह करालम्बं पथि स्खलितस्य मे।

मामकीनः कश्चिदाशाबन्ध एष तदाश्रयः,
अन्यथोपेक्षां जनो विदधीत निर्गलितस्य मे।

चन्दनस्येवैष सुरभिः कोऽपि मत्तो जायते,
एकमेव क्षणमिदानीं तद्दृगा कलितस्य मे।

तस्य दृष्टिः कापि मत्तापं हरेत् कादम्बिनी,
काननस्येवेह सुतरामन्तरे ज्वलितस्य मे।

तत्पदद्वन्द्वं विना क इतो नु मामभ्युद्धरेत्,
कच्चिदुद्धारोऽपि भविता तत्पदा दलितस्य मे।

कोऽपि न च्छायां मदीयामाश्रयेदभ्येत्य माम्,
निर्भरं कटुकस्य जातं किं फलं फलितस्य मे।

सार्थकं स्यात् केन विधिनास्तित्वमेतन्मामकम्,
कोऽपि लब्धः क्षणः स्यात् तद्दृष्टिसंवलितस्य मे।

गन्तव्यमनु प्रस्थिता विरमन्ति किमर्थम्,
चलनस्य कला येषु न प्रचलन्ति किमर्थम् ।

उपहास्यतां गत एव दिने ये ननु प्राप्ताः,
अवलोक्य परानद्य ते प्रहसन्ति किमर्थम् ।

द्रष्टा यदि येषां वत विपिनेषु न काचित्,
कुसुमापि ततो कानिचिद् विकसन्ति किमर्थम् ।

नीडेषु विहंगा इव मम चेतसि सरले,
कामा बहुसंख्या इह विलसन्ति किमर्थम् ।

भस्मेव विकीर्णोऽस्मि यदेव स्वयमत्र,
मां कतिपय एतर्हि रे प्रदहन्ति किमर्थम् ।

हितमत्र मनोहारि विधायेदमभिहितम्,
कुपिता मयि तदपीह तु प्रहरन्ति किमर्थम् ।

यः स्प्रष्टुमितो नैव पदेनापि समुचितः,
तस्यापि चरणयोर्बत निपतन्ति किमर्थम् ।

विरमापि 'जगन्नाथ' लिखितमिह बहु त्वया,
काव्यं तव केचिद् वद प्रपठन्ति किमर्थम् ।

तव द्वारि तिष्ठेन्निराशो न कश्चित्,
निरीक्षे परं रे सहासो न कश्चित्।

समे नाम तिष्ठन्त्यलङ्कारभरिताः,
परं तेषु मन्ये विलासो न कश्चित्

पृथक् शब्दविन्यासमाचक्ष्व वाक्यम्,
भवेदीषदपि वा समासो न कश्चित्।

वसन्तः क एषोऽस्ति संवत्सरेऽस्मिन्,
अवाप्तो विकासं पलाशो न कश्चित्।

भवेत् किञ्चिदाभाषणं केन सार्धम्,
तव द्वार्यहो सावकाशो न कश्चित्।

क्व निर्माणमाशास्यतामत्र काले,
घटेतैव शङ्के विनाशो न कश्चित्।

न चित्र्यं तव द्वारि तिष्ठेन्निराशः
ततो यातु, चिन्त्यं निराशो न कश्चित्।

निबद्धाः समे नाम वर्तन्त एते,
परं दृश्यते वा सपाशो न कश्चित्।

'जगन्नाथ' नैराश्यमेकं न तव रे,
हतो लभ्यते वा सदाशो न कश्चित्।

स्थिरे प्रवाहे तरन्ति मन्ये समे किशोराः समे युवानः,
सुपिच्छिले पथि पतन्ति मन्ये समे किशोराः समे युवानः ।

रजोऽपि मार्गस्थितं न सहते पदाभिघातावमाननं हि,
पदाभिघाताज्ज्वलन्ति मन्ये समे किशोराः समे युवानः ।

नवो नवो भवति जायमानो विधातृसृष्टावपूर्व एव,
अपूर्वतां धारयन्ति मन्ये समे किशोराः समे युवानः ।

अमुं पुरः पश्यतोहाख्यं विलोकय ग्राममत्र याताः,
प्रलुण्ठितस्वा भवन्ति मन्ये समे किशोराः समे युवानः ।

न कश्चिदास्ते गुरुर्हि यस्यामियं तु प्रणयाख्यपाठशाला,
स्वतः स्वपाठं पठन्ति मन्ये समे किशोराः समे युवानः ।

न कोऽपि लाभो न कापि हानिः प्रवृत्तिरेषापि सर्गजं हि,
सुरूपमात्रे स्खलन्ति मन्ये समे किशोराः समे युवानः ।

स्वरस्य माधुर्यमात्मनैव प्रभावयन्त्यर्थमातनोति,
द्रुताः स्वचित्ते भवन्ति मन्ये समे किशोराः समे युवानः ।

तवैव नगरस्य रीतिरेषा मया परिभ्रम्य दृष्टमेतत्,
हृदा न केचिन्मिलन्ति मन्ये समे किशोराः समे युवानः ।

त्यज स्ववाचालतां 'जगन्नाथ' तिष्ठ कस्मिंश्चिदत्रकोणे,
बहु श्रुतं त्वां विदन्ति मन्ये समे किशोराः समे युवानः ।

कथैव केवलमेषा न यन्मया व्यथितम्,
दया न कस्यचिदुदियाच्च यन्मया क्वथितम् ।

परस्य कस्य कथा वा निशम्यतामत्र,
अनुक्षणं बत व्यथया स्वया मया व्यथितम् ।

इतश्च सर्वमिदं म्लायमानमस्ति सुमम्,
कृते नु कस्यचिदेवञ्च यन्मया ग्रथितम् ।

स एव मामिह मन्ये न साम्प्रतं स्मरति,
सुनाम यस्य जगत्यामहो मया प्रथितम् ।

न किञ्चिदुदितमितो वा समुद्र इति मत्वा,
सुविस्तृतं निजमस्तित्वकं मया मथितम् ।

न कव्यमित्यपि मन्ये मयाभिलपितं यत्,
श्रुतं त्वया न परं तच्च यन्मया कथितम् ।

श्लथं नु कस्यचिदस्तित्वमीदृशं न स्यात्,
स्वजीवने हि 'जगन्नाथ' यन्मया श्लथितम् ।

गीतिरार्द्रा कापि मनसि श्रूयते,
स्वरविशेषस्तस्य रहसि श्रूयते ।

सङ्गतं ननु तस्य तमसि श्रूयते,
किञ्चिदेतन्नैव महसि श्रूयते ।

स्नेह उपलभ्येत बाह्ये जगति नो,
तस्य लाभः कोऽपि तपसि श्रूयते ।

सन्ति मे मनसस्तरङ्गा यादृशाः,
तादृशो नहि कोऽपि पयसि श्रूयते ।

नैव तेजसि यः शमः प्रसृते रवेः,
ननु स गहने हन्त तमसि श्रूयते ।

निन्दया ननु यः प्रभवो मेऽभवत्,
जगति नैव स नैव यशसि श्रूयते ।

विफलतां बहवो गता नु तरस्विनः,
क्वचन साफल्यं न तरसि श्रूयते ।

सन्त्यमी वर्णा भुवो नीलादयः,
कोऽपि वर्णो नैव नभसि श्रूयते ।

हे 'जगन्नाथ' ! त्वमसि ननु हतविधिः,
त्वं निमग्नः शुष्कसरसि, श्रूयते ।

एकमस्तित्वं नु छलितं मानवः,
सत्प्रसूनमलं विदलितं मानवः ।

पूर्णपूर्णमुपर्युपरि सर्वांशतः,
अन्तरन्तः शून्यकलितं मानवः ।

कर्णतः कस्याश्चिदपि दिव्यस्त्रियः,
कर्णपूरकमस्ति गलितं मानवः ।

स्वे चरित्रे हिमगिरेरप्युन्नतम्,
अन्यथा स्वपथाद् विचलितं मानवः ।

मुष्टिमेयं भस्ममात्रमपि त्वदः,
किञ्चिदन्तर्हन्त ज्वलितं मानवः ।

विषमयं नु कदापि दुर्विषहं मतम्,
अमृतमयमपि किञ्च फलितं मानवः ।

वज्रतोऽपि कठोरमतिमात्रं क्वचित्,
मृदु शिरीषादपि च ललितं मानवः ।

क्वापि सुदृढं नाम लौहस्तम्भवत्,
प्रतिपदं कुत्रापि स्खलितं मानवः ।

क्वचन रचितं विधिकरेण हिरण्मयम्,
क्वचन किञ्चन हन्त पलितं मानवः ।

न मात्रमाहृतमेको जनं शरः कुरुते,
स्व इत्यपेक्षित एवं सदा परः कुरुते ।

त्रपन्त एव यत् पशवोऽपि हन्त विदधानाः,
मुदा तदेव सुखार्थी परं नरः कुरुते ।

निजाधिकारमिहोपैतु वाथ याचितकम्,
जनस्य सर्वमिदं चेष्टितं करः कुरुते ।

फलानि दूरगतानि क्षणं करस्थानि,
करे स्थितो हि जनस्येह प्रस्तरः कुरुते ।

त्वरन्त एव सुधासाधने हरिप्रमुखाः,
विषस्य पानमहो केवलं हरः कुरुते ।

स्वमेव साधकं वा मन्यतामयं लोकः,
बलाबलं तु जनस्यावसरः कुरुते ।

न शक्नुवन्ति महान्तोऽपि यन्न साधयितुम्,
क्वचित्तदेव विनायासमित्वरः कुरुते ।

ग्रसन्त एव पुराणीह वसुमतीं सततम्,
किमेव हन्त न जाने पुरन्दरः कुरुते ।

भवेर्भवे नु 'जगन्नाथ' सन्ततं प्रवहन्,
विवेहि तन्नु यदेवैष निर्झरः कुरुते ।

प्रतिकूलमिति न तस्य मतं किञ्चिदीदृशम्,
विमुखं मया पथो न गतं किञ्चिदीदृशम्।

तस्यैव चेतसो नु भवेत् कोऽपि विभ्रमः,
वचसा मया न हन्त क्षतं किञ्चिदीदृशम्।

गमनाय तत्पुरो नु चलत एव यत्पदौ,
गन्तु धृतं मया न व्रतं किञ्चिदीदृशम्।

जानाति कश्चिदेव जनो जीवितुं कलाम्,
बहुभिः स्वजीवनं न हृतं किञ्चिदीदृशम्।

स प्रेक्षणीयतां गतो न्वस्मिन् कणे कणे,
तेजस्तदीयमेव ततं किञ्चिदीदृशम्।

श्यामस्तदीयवर्ण इति श्रूयते मया,
तत एव मे मनो नु रतं किञ्चिदीदृशम्।

आजीवनं मया नु चलितमेव तदनु रे,
गुरुराह चल पदानि शतं किञ्चिदीदृशम्।

नमनं तु तस्य केवलं पदयोर्मया कृतम्,
अन्यत्तु नामितं न नतं किञ्चिदीदृशम्।

नूनं चलाचलं हि 'जगन्नाथ' ते स्थितम्,
कथमेव रे गृहाण न तं किञ्चिदीदृशम्।

—२५—

त्वदर्थमेव मदीयं सदेदमालपितम्,
कथं त्वयीह च प्रभवेत् सखेदमालपितम् ।

कथं भवेदपि विषयः पदा प्रहारस्य,
निराक्रियेत कदाचित् पदेदमालपितम् ।

पिधत्त एव श्रवसी न यस्य शुश्रूषा,
कियन्नु मान्यमिदं स्यात् त्वयेदमालपितम् ।

मितञ्च सारमिह ब्रूहि विस्तरे मा गाः,
इदं त्वयोक्तमथाकर्णि वेदमालपितम् ।

त्वयैव केवलमेकेन न श्रुतं किञ्चित्,
शृणोति सा स्म परं मे सभेदमालपितम् ।

गतो भवेन्न स सन्देशहरस्तत्सविधे,
सखेत्येव स शृणुयात् सखेदमालपितम् ।

क एव तस्य समीपं व्रजेन्नु मत्तस्य,
न धैर्यमस्ति मे श्रोतुं तथेदमालपितम् ।

कियन्नु सम्प्रति स्मरणीयमर्थमभिदध्यात्,
श्रुतं त्वया न यदा चेद् वृथेदमालपितम् ।

त्वमन्य एव 'जगन्नाथ' दृश्यसे कविषु,
प्रवक्तुमेव न कविषु प्रथेदमालपितम् ।

स सत्यमेव 'जगन्नाथ' आस्त उन्मत्तः,
श्रुतं मयापि कदाचित् पुरेदमालपितम् ।

मदीयां प्रीतिमालक्ष्य प्रहेया मय्युपेक्षेयम्
न हेतुर्मे भवेन्मृत्योस्त्वदीया मय्युपेक्षेयम् ।

यदाहं त्वद्दृशोः पातं प्रतीक्षे सर्वतो भावात्
तदा ते जायते कस्मादिदानीं मय्युपेक्षेयम् ।

दहत्येषा न मां ज्योत्स्ना तथा चैत्रेषु रात्रीषु
तथा ते मां दहत्यन्तर्निगूढा मय्युपेक्षेयम् ।

स्मृतौ ते जाग्रतो यान्त्येव नित्यं मामका दिवसाः
न जाने कारणात् कस्मात् तवास्ते मय्युपेक्षेयम् ।

इदानीं तीव्रतामासादय त्वं हन्त नैराश्य !
प्रवृद्धिं कामपि प्राप्ता नु तस्या मय्युपेक्षेयम् ।

विशालेऽस्मिन् धराधाम्नि क्वचित् कोणे गमिष्यामि
समक्षं स्थातुमेवं ते न दास्यति मय्युपेक्षेयम् ।

निपीय प्रस्थिताः केचित् पिबन्तः सन्त्यमी केचित्
पिपासौ कश्च हेतुर्नैव जाने मय्युपेक्षेयम्

क्व सा प्रीतिः सुखालापाः क्व ते सन्तर्पणं मनसः
विधेरधुना विपर्यासात् क्व जाता मय्युपेक्षेयम् ।

कियत्यो यातनाः सोढाः सहे वा जीवने ह्यस्मिन्
न सोढुं शक्यते किन्तु त्वदीया मय्युपेक्षेयम् ।

त्वं मदन्तिके येषु ते हि नो गता दिवसाः
किं प्रतीक्षया तेषां ते हि नो गता दिवसाः

किं वसन्त आगन्ता किं कुहूरवो भविता
प्रियजने विदूरस्थे ते हि नो गता दिवसाः।

प्रीतयः श्रयन्ते नो कमपि बहिरुपाधिमिति
त्वद्वचः श्रुतं येषु ते नो गता दिवसाः।

श्वसिम इत्यहो किं रे जीवनं विनापि त्वाम्
जीवनं च येष्वासीत् ते हि नो गता दिवसाः।

त्वद्वचः श्रुतं सुखदं त्वन्मधु स्मितं पीतम्
ये च तेऽन्तिके नीतास्ते हि नो गता दिवसाः।

एष रे विधेर्दोषो नापराध्यति प्रणयः
येष्वयं समुत्पन्नस्ते हि नो गता दिवसाः।

कापि नेत्रयोर्भाषा नूतना तवासीद् रे
येषु शिक्षितास्माभिस्ते हि नो गता दिवसाः।

त्वं यदागता प्रातः त्वं यदा गता सायम्
मत्कृते नु येष्वासीत् ते हि नो गता दिवसाः।

दुःखमेव दुःखं रे किं वदेम चान्यदिह
येष्वभूत् सुखं किमपि ते हि नो गता दिवसाः।

मौनमेव धारय रे को हि नो वचः शृणुयात्
येषु नः श्रुतं वचनं ते हि नो गता दिवसाः।

त्वां विना जगतीह मुग्धे जीवितुं किमु शक्नुयाम्
शक्नुयामपि त्वामहो विस्मर्तुमपि किमु शक्नुयाम् ।

दीप इह न कुतोऽपि मन्ये स्नेह इह न कुतोऽपि रे
विस्तृते तमसीह कथमपि वीक्षितुं किमु शक्नुयाम् ।

रात्रयो यान्ति व्रजन्ति दिनानि गत्या स्वीयया
त्वत्प्रतीक्षापरवशो बत मीलितुं किमु शक्नुयाम् !

त्वं निरन्तरमेव स्मृतिमायासि नो यदि भामिनि !
अन्यदिह ननु वस्त्वहं परिशीलितुं किमु शक्नुयाम् ।

केयमुत्पन्ना तृषा मम चेतसस्त्वदवेक्षणात्
प्रणय इति तां त्वत्पुरः परिभाषितुं किमु शक्नुयाम् !

नापि रोषो नाप्युपेक्षा कापि नो विकृतिः परम्
त्वद्गतां स्थितिमात्मना परिचिन्तितुं किमु शक्नुयाम् ।

यत् स्वभावृत्येह संसदि वर्तसे पुरतो मम
त्वन्मुखादवगुण्ठनं त्वपवर्जितुं किमु शक्नुयाम् ।

मध्यतो रेखेव दत्ता हन्त लोकेनावयोः
प्रेम्णि तामहमुद्वलन्नपि लङ्घितुं किमु शक्नुयाम् ।

छिन्नो हि मूलतः प्रणयः किं प्ररोहति,
सेको विधीयतामपि चेत् किं प्ररोहति ।

तन्त्री हृदः कदाचिदियं भग्नतां गता,
कोऽपि स्वरस्ततो वद रे किं प्ररोहति ।

हृदयस्थली मरुत्वमुपेता विधेर्वशात्,
स्नेहाङ्कुरः कदापि ततः किं प्ररोहति ।

पङ्गुर्ममेयमाकाङ्क्षा त्वां गिरिस्थिताम्,
उपलब्धुमन्ततः शिथिला किं प्ररोहति ।

जन्मान्तरस्य सौहृदमथवा भवेन्न वा,
रम्यं निरीक्ष्य वस्तु न ततः किं प्ररोहति ।

मृत्योः प्रतिक्षणं यदि जागर्ति भावना,
आशा हि जीवनस्य ततः किं प्ररोहति ।

आधारवृक्ष एष न विनिपात्यतां विधे,
लतिका सुकोमला तमृते किं प्ररोहति ।

बुद्धेः प्रभाव एष वरीवर्ति सर्वतः,
हृदयस्य किं प्रभाव इतः किं प्ररोहति ।

कोऽयमिति जन एष रे स्वयमेव सम्परिचीयताम्,
अन्यथा विस्मृतिरहो स्मरणेऽपि सत्यभिनीयताम् ।

नैकशो वारं त्वयाहमुदीक्षितः परिशीलितः,
पूर्वजन्मन एष किं मम परिचयो व्यपनीयताम् ।

आश्रये वृक्षे निपतिते स्थातुमर्हति किं लता,
स्थातुमेव तथापि कियदवधि त्वयाप्यभिनीयताम् ।

जीर्णजीर्णं हृदयमन्दिरमेतदधुना मेऽभवत्,
तद्गतं तु तमः प्रणयदीपं निधाय विनीयताम् ।

का सुखाशा, क्वैव रे मम चेतसो विकृता स्थितिः,
क्षणमरे निजदृष्टिपात इतो जनेऽपि विधीयताम् ।

हृदन्तर्वर्तिनं तापं विना त्वां कः समादध्यात्,
त्वमेवैका ममाधारो विना त्वां कः समादध्यात् ।

समाधानं पिपासाया ममैता नैव रे सरितः,
सदानन्दाम्बुसद्वर्षां विना त्वां कः समादध्यात् ।

विलोके साम्प्रतं लोके कुतश्चिन्नैव सन्मित्रम्,
ममैकान्तं भरं कान्ते विना त्वां कः समादध्यात् ।

विधेर्वैमुख्यमेतस्यापि जगतो हन्त वैमुख्यम्,
समुद्यत्पूर्णसाम्मुख्यां विना त्वां कः समादध्यात् ।

न नैराश्यान्धकारं मे समाधातुं क्षमश्चन्द्रः,
स्फुरच्चन्द्राननस्फीतां विना त्वां कः समादध्यात् ।

न सन्तप्तस्य मे मेघा नभःसञ्चारिणः शरणम्,
हृदः सन्तापमेकां मे विना त्वां कः समादध्यात् ।

परिशिष्टम्

परिशिष्टम् १

स्फुटपद्यानि

परिश्राम्यन्ति, विश्राम्यन्ति नैते
कियत् ते त्वत्पराः शङ्के न शङ्के ।

विशालायां धरण्यां केचिदेते
मदीया इत्यहं शङ्के न शङ्के ।

दरिद्रेणापि यद् दीयेत प्रीत्या,
तदाढ्येनापि किं शङ्के न शङ्के ।

× × ×

जीवितं मे तथा मुञ्चतः
नास्ति काचिद् व्यथा मुञ्चतः ।

यस्य लाभेऽपि हानिर्भवेत्
तं न खेदस्तथा मुञ्चतः ।

ये चक्षते निरीक्ष्य परं ते न चक्षते,
अन्ये हि ये परीक्ष्य परं ते न चक्षते ।

सन्धाय किञ्चिदन्यदिमे हन्त चक्षते,
सन्त्यन्त्र ये समीक्ष्य परं ते न चक्षते ।

बाणः कुतः पतेच्च पथा केन निःसरेत्,
तस्मिन् क्षणे परीक्ष्य परं ते न चक्षते ।

× × ×

कस्यचित् सन्धुनोति शापो माम्,
तृप्तमित्थं दुनोति तापो माम् ।

कोऽपि पार्श्वे स्थितो विना दोषम्,
पीडितं सन्तनोति पापो माम् ।

छन्नमेव स्थितस्य कस्यापि,
लक्ष्यमित्थं वृणोति चापो माम् ।

स्वमार्गान्मां निवृत्तं मन्वते ते,
कथं मां भीतचित्तं मन्वते ते ।

गृहीतो यन्मयाऽयं भिक्षुवेषः,
विदग्धा हीनविज्ञं मन्वते ते ।

× × ×

त्वदीयं रे रहस्यं बुद्धिमानपि को हि जानीते,
स जानीते परं किञ्चिज्जनो यो नैव जानीते ।

× × ×

किञ्चिदुक्तं कथाप्रसङ्गेन
न श्रुतं तत् कथा प्रसङ्गेन ।

मद्वचोनन्तरं तया भणितम्,
इत्यलं त्वत्कथाप्रसङ्गेन ।

तर्जितोऽहं तयाऽक्षरैरेभिः,
नैष विरतो वृथा प्रसङ्गेन ।

× × ×

प्रसन्ना विषीदन्ति ते केचिदन्ये,
विषण्णाः प्रसीदन्ति ते केचिदन्ये ।

पार्श्वे कुरु त्वमद्य सुदूरेऽथवा कुरु
तीरे कुरु त्वमद्य सुपूरेऽथवा कुरु,
अस्ति त्वदर्पितस्य न मे चिन्तनीयता
दीने कुरु स्थितं बत शूरेऽथवा कुरु ।

× × ×

न दृष्टं किं तदीयं तत्सुहसितम्
क्व दृष्टं तद्वदुच्छलितं सुहसितम्
अनाघ्रातं यथा कुसुमं मुकुलितम्
मनोज्ञं श्रीसमग्रं तत्सुहसितम् ।

× × ×

न किञ्चिद् वर्तसे त्वं श्रोतुकामः,
त्वदग्रे हन्त गीतं वा न गीतम् ।
यदीयं वर्धते सुतरां पिपासा,
मधु प्रीत्येव पीतं वा न पीनम् ।

× × ×

मामपि स्थापयन्त्यमी मध्यतो विदग्धानाम्
कीदृशी, जनाः सर्वे, मुग्धता विदग्धानाम् ।

स्वो जनो नानुशीलितः कश्चित्,
एवमासं निमीलितः कश्चित् ।
स्वस्य लाभेन पीडिताः सर्वे,
स्यात् परस्मै न पीडितः कश्चित् ।
किञ्च लाभाय कस्य लावण्यम्,
नैव तिष्ठेद् वशीकृतः कश्चित् ।
शिक्षितं यत् त्वयैव स्वातन्त्र्यम्
हन्त नियमैर्नु कीलितः कश्चित् ।

× × ×

शृणुते स भाग्यभाग् जन एवेह सर्वथा,
मधुरां च कोमलामथ कान्तां पदावलीम् ।

× × ×

तव काचिदेव कृपाधिका किमु दृष्टिरस्ति ममोपरि,
परितप्तमरुमयभूमिगा किमु वृष्टिरस्ति ममोपरि ।

हृदयं परस्य प्राप्य निजं दीयते न किम्,
स्नेहोऽन्यथा जनस्य हृदि क्षीयते न किम् ।
प्रेमोपहाररूपमिदं लभ्यते न चेत्,
गत्वा कुतोऽपि पण्यमधु पीयते न किम् ।
तिष्ठन्त्यनेकशो नु तव द्वारि दर्शकाः,
तेष्वेक एव हन्त जनश्चीयते न किम् ।

× × ×

विषवत् खलस्य वाचमुदारा धयन्ति ते
खिन्नस्य मानवस्य प्रियं साधयन्ति ते ।

× × ×

इतो गत्वा न योऽद्यावधि निवृत्तः,
जनं विस्मरणशीलं तं स्मरामः ।

× × ×

अन्तरन्तः किमिदं जायत एतद् व्यथितम्
आत्मानं यदनुभवामि नितान्तं क्वथितम्;
कस्य कस्येह विकीर्णस्य कथा श्रोतव्या
छिन्नमेतर्हि कमेवेह विदध्यां ग्रथितम् ।

परिशिष्टम् २

गीतीनामकाराद्यनुक्रमणिका